# BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

*No. 131.*

---

श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायीव्याख्या ।

# गूढार्थदीपिका ।

पण्डितवर–श्रीधनपतिसूरिकृता ।

श्रीमदाचार्यश्रीवल्लभाधीश्वर–श्रीविट्ठलनाथदीक्षितशुद्धाद्वैत-
संप्रदायविदुषा रत्नगोपालभट्टेन परिशोधिता ।

GÛḌHÂRTHADÎPIKÂ,

A Commentary on Râsa Panchâdhyâyî
of the Tenth Chapter of Śrîmad Bhâgawata,

BY PANDIT DHANAPATI SÛRI

EDITED BY RATNA GOPÂL BHATTA.

*Fasciculus I*

BENARES:

*Published by the Proprietors Messrs. Braj B. Das & Co.*

AND SOLD BY H. D. GUPTA,

*Secretary, Chowkhamba Sanskrit Book Depot.*

---

Printed at the Vidyâ Vilâs Press,

BENARES.

1907.

# सूचीपत्रम् ।

| | रु० | आ० | पा० |
|---|---|---|---|
| गणपाठः | ० | ४ | ० |
| गोलप्रकाशः | २ | ८ | ० |
| गंगालहरी | ० | १ | ० |
| गुरुसारणी | ० | ४ | ० |
| जातकतत्त्वम् | ० | १२ | ० |
| तत्त्वदीप | ० | १ | ० |
| तर्कसंग्रहः | ० | १ | ० |
| दत्तकमीमांसा | ० | ८ | ० |
| धर्म्मशास्त्रसंग्रहः | ० | १ | ६ |
| धातुपाठः ( शिला -) ) | ० | २ | ० |
| धातुरूपावली | ० | २ | ० |
| परिभाषापाठः | ० | ० | ६ |
| पाणिनीयशिक्षा भाष्यसहिता | ० | २ | ० |
| प्रथम परीक्षा | ० | २ | ० |
| प्रथमपुस्तक हिन्दी | ० | १ | ० |
| प्रश्नभूषणम् ( प्रश्न विचार का बहुत उत्तम ग्रन्थ ) | ० | ४ | ० |
| बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित) | १ | ८ | ० |
| मनोरमा शब्दरत्नसहिता ( टाइप ) | ७ | ० | ० |
| लघुकौमुदी टिप्पणीसहिता | ० | ४ | ० |
| लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) ( टिप्पणीसहित ) | ४ | ० | ० |
| लक्षणावली | ० | २ | ० |
| लीलावती ( म० म० पं० सुधाकरकृतटिप्पणीसहित ) | १ | ० | ० |
| वसिष्ठसिद्धान्तः | ० | १ | ६ |
| विष्णु सहस्रनाम | ० | १ | ० |
| शब्दरूपावली | ० | १ | ० |
| शृङ्गार सप्तशती | १ | ८ | ० |
| समासचक्रम् | ० | १ | ० |
| समासचन्द्रिका | ० | १ | ० |
| सरस्वतीकण्ठाभरणम् | ३ | ० | ० |
| साङ्ख्यचन्द्रिका टिप्पणीसहिता | ० | ८ | ० |
| सिद्धान्तकौमुदी | ३ | ० | ० |
| सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता | ३ | ० | ० |
| उपसर्गवृत्ति | ० | १ | ० |
| क्षेत्रकौमुदी | ० | ६ | ० |
| क्षेत्रसंहिता | २ | ० | ० |

श्रीकृष्णाय नमः ।

श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायीव्याख्या ।

# गूढार्थदीपिका ।

श्रीधनपतिसूरिकृता ।

---

गोपाङ्गनागुणाऽऽकृष्टचेता वेत्ताऽखिलस्य यः ॥
तस्य कृष्णस्य पादाब्जमाश्रयेऽभीष्टसिद्धये ॥ १ ॥
नुमः श्रीबालगोपालतीर्थान् व्यासमुखान् मुनीन्
विघ्नहर्तॄन् गणेशादीन् पण्डिताँश्च विमत्सरान् ॥ २ ॥
अथ पञ्चभिरध्यायै रासक्रीडामहोत्सवः ॥
वर्ण्यते मुनिना सम्यक् सद्गुणाकृष्टचेतसा ॥ ३ ॥
ऊनत्रिंशे कलं वेणोः श्रुत्वा गत्वा व्रजास्त्रियः ॥
वनं वादादिकं प्रापुः कान्तेनेति निगद्यते ॥ ४ ॥

इन्द्रवरुणादिविजये किं चित्रं, ब्रह्मादिजयसंरूढदर्पः कामोऽपि भगवता पराजित इति ख्यापनाय क्रमप्राप्तां भगवत्कृतां रासक्रीडां वर्णयितुमुपक्रमते ।

श्रीशुक उवाच ।

भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ॥
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥ १ ॥

भगवानपीति ॥ कामकृतो हि ब्रह्मादिपराजयः प्रसिद्धः । तदुक्तम्—अहल्यायां जारः सुरपतिरभूदात्मतनयां प्रजानाथोऽयासी-दभजत गुरोरिन्दुरबलाम् ॥ इति प्रायः को वा न पदमपथेऽकार्यत मया श्रमो मद्बाणानां क इव भुवनोन्माथविधिष्विति । ये तु स्त्र्यादिकं विहाय तपश्चर्यायां रता, न तैः कामः पराजितः, किन्तु तस्मात् पलाय्य ते गताः । श्रीकृष्णस्तु शतकोटियूथगोपाङ्गना-रूपसैन्यवता कामेन युद्ध्यमानोऽपि आत्मन्यवरुद्धसौरतत्वाद् विजितवानित्यनेन ग्रन्थेन व्याख्यते । योगमायामुपाश्रितः, आत्मारामोऽप्यरीरमत्, साक्षान्मन्मथमन्मथः, आत्मन्यवरुद्धसौरत इत्यादिषु स्वातन्त्र्याभिधानात् । रासलीलोत्सवश्च नववर्षवयस्त्वे सत्याऽऽश्विनपूर्णिमायाम् । यतः सप्तवर्षे वयसि वर्तमाने भगवति कुमारिकाणां व्रतचर्या । ततः सप्तमवर्षोत्तरकार्तिकस्यामावास्यायाम् इन्द्रमखभङ्गः । तच्छुक्लप्रतिपदि गोवर्द्धनमखोत्सवः । द्वितीयायां भ्रातृभोजनोत्सवः । तृतीयाप्रभृति इन्द्रकृतोपद्रवमवलोक्य नवमी-पर्यन्तं गोवर्द्धनधारणम् । दशम्यां गोपानां विस्मयकथाबाहुल्यम् । एकादश्यां गोविन्दाभिषेकः । द्वादश्यां वरुणलोकगमनादि । पौर्णमास्यां नन्दादीनां ब्रह्महृदनयनादि । ततश्च शरदः समाप्तिरिति । शुक उवाचेत्यनेन कोमलालापवच्छुकोक्तिरूपमिदं भागवतं कोमलचित्ततयैव श्रोतव्यं चित्ताकर्षकं च । तत्रापि रासक्रीडोत्सववर्णनं सर्वस्यापि श्रीमद्भागवतस्य सारभूतमिति ध्वनितम् । परमहंसशिरोमणिना श्रीशुकेन परमप्रेम्णा वर्णितोऽयं रासक्रीडोत्सवोऽतः परमहंसैरप्यादरेण श्रोतव्य इत्यपि सूचितम् । भगवानपि, ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेत्युक्तषड्विधैश्वर्यवानपि रन्तुं मनश्चक्रे शृङ्गाररसालम्बनाशिरोमणिभूतानां शतकोटियूथविलासिनीनां सौ-

स्वर्यसौकुमार्यसौन्दर्याऽधराऽमृतसौरभ्याणि परमशोभनानि स्वीयश्रोत्रादीन्द्रियैरनुभवितुं स्वायानि तानि तदीयश्रोत्रादिभिस्ता अनुभावयितुमिच्छितवान् । एतावन्तं कालं गोप्य एव वर्द्धमानानुरागचलचित्ततया रन्तुं मनश्चक्रिरे । भगवाँस्तु वयोविशेषं प्रतीक्षमाणो न चक्रे, संप्रति प्राप्तवयास्ताः, मयेमा रंस्यथ क्षपा इति पूर्वप्रतिज्ञाता रात्रीश्च वीक्ष्य भगवानपि रन्तुं मनश्चक्र इत्यपेरर्थः । पूर्णाऽपि ता रात्रीरुद्दीपनत्वेनानुभूय किमुत गोपीर्वीक्ष्येति तासां सौन्दर्य्यप्रेमाद्यतिशयो व्यज्यते । यद्वा ता इति प्रसिद्धार्थकतत्पदप्रयोगान्नानागुणवतीरिति तासामुत्कर्षो बोधितः । ता इति बहुवचननिर्देशाद्, ब्रह्मरात्र उपावृत्त इति वक्ष्यमाणत्वाच्चैकस्यामपि राज्यां तादृशविलासानुकूलासंख्यातरात्रीः स्वसंकल्पिता वीक्ष्येति बोधितम् । तथाच तादृशरमणाऽनुकूलाः कोटिकोटिरात्रीः स्वसंकल्पिता वीक्ष्येत्येव तत्त्वम् । अन्यथा (पूर्णाया) राकारात्रेश्चन्द्रात् पूर्वमप्रवेशाच्चन्द्रोदयस्य च वीक्षणानन्तरं वर्ण्यमानत्वाद् वीक्ष्येत्युक्तिरसंगता स्यात् । अथ वृन्दावनशोभामप्युद्दीपिकामाह ॥ शरदिति ॥ शरदा हेतुभूतया । यद्वा शरदेति टाबन्तत्वात् । शरदायामपि उत्फुल्ला मल्लिका यासु । उत्फुल्लाश्च ता मल्लिकाश्चेति वा । एतद्वाक्यात्, कुन्दस्रजः कुलपतेरिह वाति गन्धः, रेमे तत्तरलानन्दिकमलामोदवायुनेति वक्ष्यमाणत्वाच्च वृन्दावनमाहात्म्यात् सर्वकाले सर्वपुष्पविकासो बोधितः । रन्तुं मनश्चक्रे इत्युक्त्या आन्तरमिदं रमणं, न तु बाह्यं नरविडम्बनमात्रमिति सूचितम् । अन्यथा, रेमे, रन्तुमारेभे इति वा ब्रूयात् । तत्रापि, चक्र इत्यात्मनेपदप्रयोगात् तदपि न गोपिकानुरोधेन तदर्थमेवापि तु स्वस्य सुखार्थमपीति सूचयति । यथा, आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे*कुर्व-

न्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरित्यत्रात्मारामाणामपि मुनीनां चित्ताकर्षणसामर्थ्यवद् गुणाकृष्टचेतसां भगवद्गुणेषु रमणमुक्तम् । तद्वद्गोपाङ्गनानां तादृशगुणाकृष्टचेतसो भगवतोऽपि तासु रमणमुक्तम् । ननु स्वल्पकाले कथमनल्पकालसमावेशः, कथश्च स्वल्पदेशे तावद्यूथगोपाङ्गनाक्रीडनसंभवः, कथश्चैकस्याऽसंख्यातगोपिकाभिरभिरमणसम्भवः, कथश्च अमनस्कभगवतस्तद्रमणासक्तमनस्त्वमित्यादिशङ्काजालं, तन्निरासायाह ॥ योगमायामुपाश्रित इति॥ अघटितघटनापटीयसीं, मायां तु प्रकृतिं विद्यात्, मम मायादुरत्ययेत्यादिनोक्तां योगमायाम् उपाश्रितः । स्वाश्रितां तां कर्तव्यलीलोपकरणसाधनत्वेनाश्रितवान् । यद्वा योगः स्वेन गोपीनां संयोगस्तदर्थं मायां कृपाम् उप आधिक्येनाश्रितः।यद्वा स्वस्मिन् वात्सल्यरसाक्रान्तचेतसां नन्दादीनां तया तया लीलया आनन्दसागरे निमज्जितवान् । पुनश्च ब्रह्महृदप्रवेशादिना स्वस्वरूपानन्दप्राप्तिपर्यन्तामप्यवस्थां दर्शितवान् । यास्तु सखीभावमाश्रित्य चिरकालमारभ्य स्वेन रमणोत्कटोत्कण्ठावत्यस्तासां गोपङ्गनानां मनोरथपूर्तिं कथं कृतवानित्यपेक्षायामाह॥ भवानपीति ॥ यद्यप्यासौ पूर्णकामस्तथापि पूर्वकोटिजन्मस्वऽस्मिँश्चजन्मनि उपाश्रितो रमणार्थमेव सम्यगाराधितो यस्ताभिः स, तास्तासामभिलीषतवितरणानुरूपा रात्रीश्चक्रे, एकस्यां रजन्यामसंख्यातरजनीप्रदर्शनसङ्कल्पं कृतवान्। कथंभूताः? शरदोत्फुल्लमल्लिकाः । यासु शरदोत्फुल्लमल्लिकाश्च चक्रे इति वा । मल्लिकेति पुष्पान्तराणामप्युपलक्षणम् । तथा अमना अपि भगवान् रमणानुरूपं मनोऽपि चक्रे । इदश्च सर्वम् अघटितघटनापटीयस्या स्वयोगमायाशक्त्या सम्पादितवानित्याशयेनाह । योगमायां वीक्ष्य सर्वसम्पादनाय कटाक्षेणोद्बोध्य । मम योगमायाशक्त्या एतासां मनोरथपूर्तिर्भविष्यति, तत्र मम

का हानिरित्याशयेन ता वीक्ष्येति वा । यद्वा तासां योगार्थं मायां वीक्ष्य । तथाच मायिकेन संयोगेन नास्ति मम पूर्णकामत्वादिस्वरूपहानिरिति भावः । यद्वा भगवानपि योगमायामुपाश्रितो योगमायाम् अधिष्ठाय प्रकटीकृतनन्दनविग्रहस्ताः स्वस्मिन्नासक्तस्वान्ता गोपीर्वीक्ष्यालोच्य तन्मनोरथपूर्त्यर्थं रात्र्यादिकं चक्र इत्यर्थः।

यद्वा ता रात्रीर्वीक्ष्य तासां मनश्चक्रे रन्तुं योगमायामधिष्ठाय स्थितः । योगमायया. कृष्णेन सार्द्धं सम्यग्रमणं कृतवत्यो वयमिति तासां मनस्सु दृढतरां प्रतीतिमुत्पादयितुं प्रवृत्त इत्यर्थः पञ्चाध्याय्यात्मकोऽयं सर्वशास्त्रसारसर्वस्वभूतो ग्रन्थ इति सूचयितुं मङ्गलाचरणार्थमादौ भगवानिति पदं प्रयुक्तम् । अत्र भक्तिशान्तिरसप्रधान श्रीमद्भागवते पारमहंस्यां संहितायां प्रसङ्गात् परशास्त्रार्थश्रृङ्गाररसमनुवदता मुनीन्द्रेण स्वासिद्धान्तोऽपि गूढतया निर्दिष्टः । अत एव श्रृङ्गारकथापदेशेन विशेषतो निवृत्तिपरेयं पञ्चाध्यायीति श्रीधरस्वामिभिरप्युक्तम् ।

निवृत्तिमार्गसंभक्तचेतसां विदुषां मुदे ।
व्यक्तीकरोम्यहं पक्षमिमं कृष्णप्रसादतः ॥

सविशेषसुखं निखिलमपि दुःखसंभिन्नमेव । ये हि संस्पर्शजा भोगा दुःखयोनय एव ते * आद्यन्तः कौन्तेय न तेषु रमते बुध इति भगवद्वाक्यादतो विवेकवता निर्विशेषब्रह्मानन्दाविर्भावाभिलाषुकेण तत्प्रतिपित्सानिवृत्तिरेव सर्वोपायैः संपाद्येति ब्रह्मरात्र्यवच्छिन्नकालपर्यन्तं तुच्छीकृतकोटिकन्दर्पविग्रहेण भगवताऽपि रममाणानां गोपाङ्गनानां दुःखनिवृत्तिस्तृप्तिश्च न संपन्नेति वर्णयता भगवता मुनिना सूचितमातदुक्तं—न जातु कामः कामानामुपभोगेन शाम्यति * हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धत इति । एवंविधविवेकोत्पत्तियोग्ये इह जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्तनपुरः-

सरनित्यनैमित्तिकशायश्चित्तोपासनानुष्ठानेन नितान्तनिर्मले स्वाऽनुग्रहपात्रेऽन्तःकरणे श्रुतिरूपस्वकान्ताभिरभिरन्तुं भगवानपि मनश्चक्रे । यमेवैष वृणुते तेन लभ्य इत्यादिश्रुत्या भगवदनुग्रहादेव श्रुत्यर्थविचारे प्रवृत्तिर्भवति, नान्यथेति भावः । भगवदनुग्रहपात्रताबोधनायाह । ता रात्रीरसख्यातजीवजन्मसु अनुभूता अहंकारचित्तमनोबुद्धिरूपा अन्तःकरणवृत्ती रात्रीरज्ञानरूपतमोव्याप्तत्वाद् आत्मतत्त्वाऽऽवरणरूपत्वाद् रात्रिसदृशाः संप्रति शरदोत्फुल्लमल्लिकाः शरत्स्थानापन्नेन भगवदाराधनलक्षणेन निष्कामकर्मणा अन्तःकरणशुद्धिसाधनेन फुल्ला विकासिता मालत्यादिपुष्पस्थानापन्नाः शान्त्यादयो यासु ता वीक्ष्य । शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वा आत्मन्येवात्मानं पश्येदिति श्रुतेः । ननु निर्गुणस्य जातिगुणादिशब्दप्रवृत्तिनिमित्तरहितस्य श्रुतिप्रतिपाद्यत्वासम्भवात् कथं ब्रह्मणि तासां रमणमित्याशङ्क्याह । योगमायामुपाश्रित इति ॥ तथाचातन्निरसनेन निर्विशेषब्रह्मोपलब्धिलक्षणमेव तासां रमणमिति भावः ॥ १ ॥

तदैव चन्द्रमा अपि भगवद्भावमुद्दीपयन्नुदगादित्याह ।

तदोडुराजः ककुभः करैर्मुखं
प्राच्या विलिम्पन्नरुणेन शन्तमैः ॥
स चर्षणीनामुदगाच्छुचो मृजन्
प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥

तदेति ॥ तस्मिन्नेव क्षणे स प्रसिद्ध उडूनां नक्षत्राणां राजा चन्द्र उदगादुदयं प्राप्तः । उडुपदेन नक्षत्राणामपि तत्परिवारत्वेन उदयः सूचितः । किञ्च, मनसापि न गन्तव्याः परदाराः कदा-

चनेति निषेधमनुसंधाय महत्समक्षे लज्जया वा रमणाच्चेतसः परावृत्तिमपि निराकरोदित्याशयेनाह ॥ ककुभ इति ॥ प्राच्या इन्द्राऽधिष्ठिताया दिशो मुखं शंतमैः परमसुखकरैः करैः किरणलक्षणहस्तैर्धृतेनारुणेनोदयरागेण विलिम्पन्नरुणीकुर्वन्। तथाचानया प्रवृत्त्या कृष्णमेवमुपदिशति स्म भगवाँश्चन्द्रः-भो यदुकुलावतंस, अपेतदोषशङ्क आरमणाच्चित्तं मा निवर्त्तय, मद्वंश्यत्वात्। यथाऽहं तवकुलादिपुरुषो द्विजराजस्तत्रापि पुरातनस्तत्रापि राजयक्ष्माऽऽक्रान्तस्तत्रापि परमसुन्दरानेकस्त्रीपतिः प्राच्या दिशः परस्त्रिया मुखं स्पृशन्नेव स्वयं तस्यामनुरक्तस्तामप्यनुरागवतीं करोमि तद्वत् त्वमपि मद्वंश्यस्तत्रापि नववयास्तत्राप्यविवाहितत्वात् स्वभार्यारहितस्तत्रापि सर्वदोषविनिर्मुक्तपरमसुन्दरविग्रहस्तत्रापि सम्प्रति गोपजातिनिविष्टो यथेष्टं गोपाङ्गनाभिरभिरमणं कुरु, नास्ति तव दोषगन्धोऽपि । यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः * स यत् प्रमाणं कुरुते लोकस्तदनुवर्तत इति न्यायात्तु, तेजीयसो न दोषायेत्युक्तत्वादेतावता नास्ति मम दोषसंपर्कस्तव त्वतितेजस्वित्वात् सुतरामित्यपि स एव बोधितवानित्याशयेनाह ॥ चर्षणीनामिति ॥ अर्यम्णा मातृकापत्नी तयोश्चर्षणयः सुताः * यत्र वै मानुषी जातिर्ब्रह्मणा परिकल्पितेति षष्ठस्कन्धोक्तमानुषजातीनां शुचः शरदर्कजसंतापदुःखानि मृजन् अपनयन् । तथाच समस्तजनतापनिवर्तकस्य नास्ति तादृशदोषजनिततापावाप्तिसम्भावनेति भावः । तत्रानुकूलं दृष्टान्तमाह ॥ प्रिय इति ॥ दीर्घकालेन दर्शनं यस्य स प्रियः स्वरमणः प्रियायाः स्वरमण्या मुखम् अरुणेनानुरागेण स्वकरधृतेन कुङ्कुमेन च यथा लिम्पति तद्वत् । यद्वा मनःकरणसमकालमेव चन्द्रोऽपि तादृशाऽसंख्यातराव्यनुकूल एवोत्पादित इत्याह ॥ तदेति ॥ तदा तस्मिन्नेव क्षणे स्वसंकल्पितश्चन्द्र उदगात् । स च

किञ्चिद्विज्ञापयन्निवोदगादित्याशयेनाह ॥ ककुभ इति ॥ तथाच, चन्द्रमा मनसो जात इति श्रुतेस्त्वत्त उत्पन्नस्य त्वत्प्रसादलब्धप्रतापस्य ममापि नास्त्येवंविधकर्मलेपः । तत्र तु सर्वेश्वरस्य कुतस्त्योऽतः स्वभक्तानामासां मनोरथं पूरयेति बोधयन्निवेति भावः । किञ्च, सर्वसन्तापनिवृत्त्यर्थं प्रवृत्तौ लोकदृष्ट्या प्रतीयमानोऽपि दोषो न संस्पृश्यत इत्यपि विज्ञापयन्नित्याशयेनाह॥ चर्षणीनामिति ॥ यद्वा यथा मम प्राच्याः ककुभः सम्बन्धः परदारसंपर्कवत् प्रतिभाति, न तु वस्तुतस्तत्सम्पर्कः, किन्तु सर्वजनतापनिवृत्त्यर्थं प्राच्यां दिशि समुदयमात्रं, तथा भगवतोऽपि स्वजनसन्तापनिरासार्थं कृतावतारस्य तत्तल्लीलया भक्तसुखसंपादकप्रवृत्तौ मूढजनानां लौकिकरमणादिप्रतीतावपि नास्ति किञ्चिद् बाधकमिति विज्ञापयन्निवोदगादत्याशयेनाह ॥ ककुभ इति ॥

निवृत्तिपक्षे—तदा भगवत्प्रसादोदयक्षण एवोडूनां तत्स्थानापन्नानां शुभवृत्तीनां राजा विवेकाख्यश्चन्द्र उदगात् । किं कुर्वन्नित्यपेक्षायामाह ॥ ककुभ इति ॥ प्राच्या अनेकजन्मप्रवृत्ताया अविवेकदशाया मुखं जाड्यलक्षणं करस्थानापन्नैस्तत्तद्विचारैः संपादितेनारुणेन तत्त्वंपदार्थावबोधलक्षणेन रागेणलिम्पन् तिरोहितं कुर्वन् । अत एव चर्षणीनामधिकारिजनानां तत्तद्वस्तुविषयकान् शुचः अपनयन् । तत्र दृष्टान्तमाह ॥ प्रिय इति ॥ २ ॥

तथा विज्ञापयन्तं चन्द्रमवलोक्य यत् कृतवाँस्तदाह ॥

दृष्ट्वा कुमुद्वन्तमखण्डमण्डलं
रमाननाभं नवकुङ्कुमारुणम् ॥
वनं च तत्कोमलगोभिरञ्जितं
जगौ कलं वामदृशां मनोहरम् ॥ ३ ॥

दृष्ट्वेति ॥ कुमुदेऽपि कुमुत् प्रोक्तमिति विश्वात् कुमुत् कुमुदं विकासनीयत्वेन विद्यतेऽस्येति । यथा स्वभक्ताः कुमुदिन्यः समुदयं प्राप्तेन मया विकासं प्रापितास्तथा स्वभक्ता गोप्यस्त्वयाऽपि विकासनीयाः । उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् * विभावयन् समृद्धीनां फलं सुहृदनुग्रहमित्युक्तेरिति विज्ञापयन्तमिव । पुनश्चाऽखण्डं मण्डलं बिम्बं यस्य तम् । परोकारशीलस्य काऽपि हानिर्न भवतीति सूचयन्तमिव । अनेन राकेति ध्वनितम् । पुनश्च रमाया लक्ष्म्या आननाऽऽभावद् आभा कान्तिर्यस्य। तद्भ्रातृत्वात् । तथाच लक्ष्म्याः स्मारकत्वेन रमणेच्छामुद्दीपयन्तमिवं। स्वभार्याभ्रातृत्वाच्छ्यालकस्य मम सन्निधौ संकोचो न विधेय इति वा सूचयन्तमिव । यद्वा, सर्वलक्ष्मीः सर्वकान्तिः सर्वसंमोहिनी परा * इति स्मृतेः, रमा श्रीराधा । रमन्ते रमयन्तीति वा रमा गोप्यश्च तासामाननस्याभेवाभा यस्य तम् । स्वदर्शनेन ताः स्मृतिपथमारोहयन्तमिव । तथा उदयरागव्याप्तत्वान्नवकुङ्कुमापिण्डवदरुणं विवाहसमये यल्लक्ष्म्यादिमुखं तत्तुल्यत्वान्नूतनकाममुद्दीपयन्तमिव । वनं च तस्य तथाभूतस्य चन्द्रस्य कोमलैर्गोभिः किरणैरभिरञ्जितं, गोभिः अञ्जितं व्याप्तमिति वा। यद्वा भावेक्तः। तत्कोमलगोभिररभिञ्जनं यत्र। किरणानां सुधादोग्धृत्वं, वन एव पाल्यमानत्वं च ज्ञापयितुं गोपदम् । तत्रापि शीतबाधाकरत्वनिरासाय कोमलपदम् । तथाच यथोक्तविशेषणविशिष्टं चन्द्रं रमणयोग्यं वनं च दृष्ट्वा, कलं जगौ॥ अत्र विशेष्यस्याऽनुक्त्या आत्मा मुखं वापि विशेष्यं ज्ञातव्यम् । अस्मिन् पक्षे, कोः पृथिव्या अपि मुत् कर्तव्यत्वेन विद्यते यस्य तमात्मानम् । मुखपक्षे कुमुद्वदिति लिङ्गविपरिणामः । अनेन भूचरसुखार्थं कृतावतारेण मया मदासक्तमानसा गोप्योऽपि मयाऽभिरमणेन सुखिन्यो विधेया इति ध्वनि-

तम् । पुनश्चाखण्डमन्यूनानतिरिक्तं मण्डलं नासाकर्णाद्यङ्गचक्रं यस्मिन् । अनेन गोप्यर्थमेव तुच्छीकृतकोटिकन्दर्पविग्रहस्य प्रादुष्कृतत्वात् ता अवश्यं रमयितव्या इति सूचितम् । पुनश्च रमाणां तासामाननानामाभा यस्मिन् । अनेन स्वस्मिंस्तासां खचितत्वदर्शनेन तत्फलप्रदानस्यावश्यकत्वं सूचितम् । पुनश्च ताभिर्लिप्तेन नवकुङ्कुमेनारुणम् । यद्वा, अत एव तन्मुखलिप्तेन नवकुङ्कुमेन प्रतिबिम्बितेनारुणम् । अनेन स्वविग्रहस्य तद्विग्रहगतरागरञ्जितत्वदर्शनेन तन्मनोगतरागेण स्वमनसोऽपि रञ्जितत्वमावश्यकमिति ध्वनितम् । तद्विकस्तिनकुसुमाद्यलङ्कृतम् । पुनश्च स्वस्य स्वमुखस्य वा कोमलगोभिरभिरञ्जितम् । एवमुद्दीपनालम्बनविभावौ दृष्ट्वा, कलम्, अव्यक्तमधुराक्षरं यथा स्यात् तथा, जगौ गानं कृतवान् । तदपि वेणुनेति ज्ञातव्यम् । कलपदाऽमृतवेणुगीतेति वक्ष्यमाणात् । तत्र मधुरमिति मनोहरणशक्तिमत् । अव्यक्तमिति सर्वासां स्वस्वाह्वानज्ञानोत्पादकमन्येषां तदाह्वानानिश्चायकं चेति बोधितम् । मधुरत्वात् सर्वाकर्षणं वारयति ॥ वामेति ॥ वामा मनोहरा दृशः कटाक्षा यासां, वामं सुन्दरं दृग् दर्शनं यासामिति वा । तासां युवतीनां सौन्दर्य्यादिगुणगणालंकृतानामेव मनोहरं यथा स्यात् तथा । गायन्तं स्त्रियः कामयन्त इति श्रुतेः। वामाः स्वस्मिन् कुटिला दृशो यासां तासां मनोहरमिति श्लेषेण सर्वदा स्वस्मिन् कुटिलमेव पश्यन्तीनां सर्वेन्द्रियप्रवर्तकमनस आकर्षणेन तथा दर्शनाभावाय चेत्यपि द्रष्टव्यम् । कलं वामदृशामित्यत्र श्लेषान्तरेण कामबिजं, क्लीम्— इत्याकारकं जगावित्यपि ज्ञेयम् । तथाहि । कलं ककारलकारौ । वामदृशेति टाबन्तम् । वामदृशा ईकारः । मन्त्रशास्त्रे वामदृगिति चतुर्थस्वरस्य संज्ञा। ईकारश्च म् च वामदृशामिति समाहारद्वन्द्वे अमो लुकि रूपम् । तथाच ईमिति च तेन क्लीमिति सिद्धम् ।

निवृत्तिपक्षे, अथ भगवत्कृतमनुग्रहान्तरं दर्शयति ॥ दृष्ट्वेति ॥ कुत्सिता अनित्याऽशुचिविषयप्राप्तिजन्या मुत् कुमुद्, न कुमुद् अकुमुत् = तदभावः कर्तव्यत्वेन विद्यते यस्य विवेकलक्षणचन्द्रस्य तम् । तत्राप्यखण्डं मण्डलं वैराग्यशान्त्यादिसाधनसमूहो यस्य तं पूर्णं वैराग्यादियुक्तम् । यतो, रमाननाभं रमायाः संपत्सम्पदादिरूपेण परिणताया आनने मुखे अभा अदीप्तिर्यस्मात् तम् । विषयमात्रसौन्दर्यबुद्धिनिवर्तकम् । पुनश्च, नवकुङ्कुमारुणम् । पूर्वं हि अनात्मवर्ग एवानुरागः स्थितः । संप्रति नवीनेन कुङ्कुमस्थानापन्नेनात्माऽनुरागेणाऽरुणं वनं कामक्रोधाद्यनेककण्टकद्रुमाद्याक्रान्तत्वात् तत्स्थानापन्नमन्तःकरणं, संप्रति, तत्कोमलगोऽभिरञ्जितं तस्य विवेकलक्षणचन्द्रस्य कोमलैः सर्वसुखकरैस्तत्तद्विचारभेदलक्षणैः किरणैरभिरञ्जितम् यद्वा तदन्तःकरणलक्षणं वनं कोमलैस्तत्कार्यप्रभावैः शास्त्रश्रवणसत्पादस्पर्शभगवन्मूर्तिसञ्जनदर्शनभगवन्नैवेद्यास्वादनभगवच्चरणारविन्दार्पिततुलस्याघ्राणभगवन्नामस्मरणार्चनादिपरैर्गोभिरिन्द्रियैस्तज्जन्याभिर्वृत्तिभिराभिरञ्जितं शोभितं च दृष्ट्वा कलम् अनेकार्थसूचकं मधुराक्षरम्, अथाऽतो ब्रह्मजिज्ञासा, जन्माऽऽद्यस्य यतः, शास्त्रयोनित्वात्, तत्तु समन्वयादित्यादिसूत्रजातं कृष्णद्वैपायनात्मनाऽऽविर्भूय जगौ । कथं भूतं कलं, वामदृशां वामस्य परमसुन्दरस्य परमात्मनो दृग् ज्ञानं याभ्यस्ता उपनिषदः । तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेस्तासां परब्रह्मणि तात्पर्याऽवधारणकारणम् । वामा सुन्दरा दृग् ज्ञानं यासां तासामिति वा । यद्वा कुटिला दृशो यासामस्पष्टब्रह्मलिङ्गभेदाद्यनुवादिकानां, मनोहरं प्रत्यगभिन्ने ब्रह्मणि तात्पर्यापहरणपरम् । यद्वा कुटिलज्ञानानां वादिनां मनोहरं तदभिप्रेतार्थनिरासकरम् । यद्वा वामदृशां शोभनज्ञानवतां विवेकिनां वेदान्तशास्त्राधिकारिणां सतां मनोहरं मनो-

ज्ञम्, अमनोज्ञं तु विषयासक्तचेतसाम् । यद्वा, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, सोऽन्वेष्टव्यः स विजिज्ञासितव्य इत्यादिरूपं कलं जगौ । कीदृशं? वामदृशामनात्मपदपदार्थविषयाणां कुटिलवृत्तीनां मनोहरम् । तत्कारणभूताऽनात्मप्रवणमनस उपशामकम् । यद्वा यथोक्तविवेकिनां मनोज्ञमित्यर्थः ॥ ३ ॥

अथ तादृशगानानन्तरं यद् वृत्तं तदाह

निशम्य गीतं तदनङ्गवर्धनं
व्रजस्त्रियः कृष्णगृहीतमानसाः ॥
आजग्मुरन्योन्यमलक्षितोद्यमाः
स यत्र कान्तो जवलोलकुण्डलाः ॥ ४ ॥

निशम्येति॥तद् गीतमनङ्गस्य कामस्य वर्द्धनम् अङ्कुरितस्य कामस्य सर्वाङ्गसंपूर्णतापादकम्।एतेन तस्याऽमृतसेकरूपत्वं सूचितम् । यद्वा । तद् गीतमनङ्गस्य सर्वाङ्गरहितस्यानङ्कुरितस्यापि कामस्य वर्द्धनं = तत्क्षणमेवोत्पाद्य अभिवृद्धिपर्यन्तं नयनसमर्थम् । तास्तु व्रजस्त्रियश्चिरकालमारभ्य तद्विषयककामाविष्टस्वान्तास्तादृशं गीतं निशम्याऽऽकर्ण्य कलगीतलक्षणसूत्रगुम्फिताः पाञ्चालिका इवाऽऽजग्मुः । जग्मुरिति वक्तव्ये स्वस्य कृष्णसन्निधानावेशादाऽऽजग्मुरित्युक्तम्।ननु किं सर्वा अपि व्रजस्त्रिय आजग्मुस्तत्राप्यन्योन्यमऽलक्षितगमनविरोधइतिचेत्तत्राह॥कृष्णगृहीतमानसाः॥कृष्णेनैव पूर्वमेव गृहीतं मानसं मनोयासां तास्तत्राप्यन्योन्यमलक्षितो भगवतः पतित्वेन स्वीकारलक्षण उद्यमो यासां ताः । प्रत्येकमेव भगवन्तं पतित्वेनाङ्गीकृतवत्यः । संभ्रमः स्नेहमाख्यातीत्युक्तत्वात् स्नेह-

व्यापकं तासां संभ्रममाह ॥ जवेन लोले सकम्पे कुण्डले यासां ताः । अनेन कर्णव्यथानुसंधानाभावः सूचितः । यद्वा, मां गच्छन्तीमालक्ष्येयमपि यास्यतीति सापत्नभयात् कृष्णगृहीतमानसत्वेन विचाराऽस्फूर्तेर्वा अन्योऽन्यमलक्षितगमनोद्योगाः । अत एव जवेन चञ्चलकर्णाभरणाः । कुत्रेसत आह ॥ सः पूर्वमुपागतः कान्तो यत्र स्थितस्तत्र । यद्वा चोरचक्रवर्तिना श्रीकृष्णेन गृहीतानि मानसानि तत्सम्बन्धीनि, धृतिस्मृतिविवेकलज्जाभीतिमत्वादीनि च यासां ता आजग्मुः । अनेन कृष्णो हि महाचोराधिराजो वेणुगीताख्यस्वभृत्यमहाचोरं व्रजे प्रेषितवाँस्तेन च व्रजाङ्गनानां विवृतकर्णद्वारेण अन्तःकरणं कोशागारंप्रविश्य धैर्यादिमहारत्नपूरितमनोमञ्जूषामपहृत्य झटित्येवानीय स्वस्वामिने दत्तां तां कृष्णात् प्रार्थयितुमिवेति सूचितम् । अत एव महाचोरं धर्तुं व्यग्रत्वात् सूचकमनआदेरपहृतत्वाद्वा अन्योऽन्यमलक्षितोद्यमाः । अत एव जवलोलकुण्डलाः । कुण्डलेति कङ्कणकिङ्किण्यादेरप्युपलक्षणम् । अनेन बाहिर्गृहस्थानापन्नस्थूलदेहस्थधान्यादिस्थानीयभूषणान्यल्पत्वबुद्ध्या । चैरेण तेन नापहृतानीति ध्वनितम् ॥

निवृत्तिपक्षे एवं भगवदनुगृहीतस्य विवेकवैराग्यादिसाधनसंपन्नस्यान्तःकरणे परब्रह्मणा श्रुतिरूपकान्तानामभिरमणं सर्वतो वृत्तिनिरोधनं च संपन्नमित्याह॥निशम्येति॥तद्यथोक्तं गीतं व्रजास्त्रियः श्रुतीनां गवामवस्थितिस्थानं वेदो व्रजशब्देनाभिधीयते।तत्संबन्धिन्यः स्त्रियः श्रुतयः श्रुत्वा स कान्तः कमनीयः परमपुरुषार्थभूतः परमात्मा यत्र विवेक्यन्तःकरणलक्षणे वने वर्तते तत्र आजग्मुः । ब्रह्मप्रतिपादकत्वेन स्फूर्तिं गताः । तेषामेवानुकम्पार्थमहमज्ञानजं तमः * नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति भगवद्वाक्यात् स्वभक्तान्तःकरणस्थितः श्रुतिभी रममाणस्तदज्ञानं नाश-

यतीति विज्ञायत इत्यर्थः । आजग्मुरित्युक्त्या स्वान्तःकरणवर्तिपरमात्मन्येवाजग्मुरिति सूचयति । गीतं विशिनष्टि ॥ अनङ्गवर्द्धनम् ॥ अथात आदेशो नेति नेतीत्युक्तस्य मूर्तामूर्तलक्षणाङ्गविनिर्मुक्तस्य निर्विशेषस्य ब्रह्मणो वर्द्धनमज्ञानाद्वृतस्य तस्याज्ञाननिवर्तनेनाविर्भावकरं, यद्वा अङ्गानां देहानां वर्द्धनमसंख्यातदेहोत्पत्तिकारणमज्ञानमङ्गवर्द्धनं तद्विरोधयनङ्गवर्द्धनम् । कथम्भूता व्रजस्त्रियः ? कृष्णेन सदानन्दस्वरूपेण परमात्मना गृहीतं मानसं तात्पर्य्यं यासां ताः कृष्णे तात्पर्येण समन्विताः । पुनश्चान्योन्यमलक्षित उद्यमः परमात्मप्रतिपादनरूपो यासां ताः । परस्पराकाङ्क्षारहिताः । प्रत्येकं स्वत एव प्रमाणभूता इति यावत् । पुनश्च जवेन लोलानि चलानि झटिति नाशोन्मुखानि कुण्डलानि आशादिरूपाः पाशा याभ्यस्ताःविचारिताः सत्य आशु जीवात्मपाशनिवर्तिका इति यावत् । कुण्डलं कर्णभूषायां पाशेऽपि वलयेऽपि चेति मेदिनी । मनसो वृत्तयोऽपि इन्द्रियलक्षणगवां वासस्थानत्वाद्देहो व्रजशब्देनोच्यते । तदन्तरवस्थानाद् व्रजस्त्रियः, कृष्णेन गृहीतं कारणभूतं मानसं यासां ताः कृष्णासक्तमनःसम्बन्धिन्यः । यद्वा कृष्णेन गृहीतः स्वीयत्वेनाङ्गीकृतः कृष्णानुगृहीतो विवेकादिसाधनसंपन्नस्तस्य मानसा मनःसम्बन्धिन्यो, न त्वनधिकारिणः । परस्परं निरपेक्षव्यापारवत्यस्तत्तदिन्द्रियद्वारा निःसृत्य स्वस्वविषयप्रकाशने स्वतन्त्राः, स कान्तो यत्र वर्तते तत्र आजग्मुः । बहिर्मुखतां विहायाऽन्तर्मुखतां प्राप्तास्तदानीं जवेन झटिति लोलानि कम्पितानि कुण्डलानि पाशा याभ्यस्ताः । समानमन्यत् ॥ ४ ॥

आजग्मुरित्युक्तावपि प्रतिबन्धकानां तत्तद्व्यापाराणां सत्त्वात् कथं स्वस्वगृहात् तासां निःसरणमित्यपेक्षायां प्रेष्ठसूचकशब्दश्रवणमात्रेण तत्प्रवणमानसानां तत्क्षणमेव त्रैवर्गिककर्मनि-

र्वृत्तिर्जातेति सूचयँस्तासां निर्गमनप्रकारमाह ॥

दुहन्त्योऽभिययुः काश्चिद्दोहं हि हित्वा समुत्सुकाः ॥
पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥ ५ ॥
परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः शिशून् पयः ॥
शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम् ॥ ६ ॥
लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने ॥
व्यत्यस्तवस्त्राभरणाः काश्चित् कृष्णान्तिकं ययुः ॥ ७ ॥

दुहन्त्य इति ॥ दुहन्त्यो दोहयन्त्यस्तत्क्रियामध्ये एव दोहं दोहनं हित्वा काश्चिद् अभिययुः वेणुगीतकृतप्रेष्ठाभिमुखं ययुः । यद्वा दोहनपात्रं गृहीत्वा काश्चित् स्थितास्तत्समये गीते श्रुते तत्पात्रं विहायाभिययुः । यद्वा दोहनानन्तरं दुग्धपात्रं गृहीत्वा काश्चित् स्थितास्तत्क्षणे वेणुगीते श्रुते तत् त्यक्त्वाऽभिययुः । काश्चित् स्थालीस्थं पयश्चुल्ल्यामधिश्रित्य तत्क्वाथार्थं तदधिसेचननिवृत्त्यर्थं च तत्सन्निधौ स्थितास्तत्समये वेणुगीतमन्तःप्रविष्टं, ततस्तत्क्वाथमप्रतीक्षमाणास्तद्रक्षणं विहायाभिययुः । अपराः संयावं पक्वं गोधूमकणान्नमनुद्वास्य तन्नाशमप्यननुसन्धायाभिययुः । यतः समुत्सुका उत्कटोत्कण्ठावत्यस्तद्विलम्बसहनासमर्थाः । एतेन स्वजातिधर्मं विहायाभिययुरित्युक्तम् ॥ ॥ अथ स्त्रीमात्रधर्मत्यागमाह ।

परिवेषयन्त्यो बन्धुभृत्याद्यग्रे परिवेषणं कुर्वत्यस्तत्परिवेषणं विहाय काश्चिदभिययुः । अतिस्निग्धान् शिशून् पयो दुग्धं स्तन्यमितरद् वा पाययन्त्यस्तत्पायनं हित्वा काश्चिदभिययुः । पतीन् सर्वथा सेवनीयान् शुश्रूषन्त्यः पादप्रक्षालनादिसेवां वा

कुर्वत्यस्तां सेवां विहायाभिययुः । काश्चिद् भोजनं कुर्वत्यो भोजनं त्यक्त्वा अनाचान्ता एवाभिमुखं ययुः । कृष्णान्तिकं ययुरित्युत्तरत्र चान्वयः । एतेन बन्धुभृत्यत्यागः, अतिस्निग्धत्यागः, स्वधर्मत्यागः, स्वदेहपोषणत्यागश्चोक्तः ॥

काश्चिच्चन्दनकुङ्कुमादिना भगवदङ्गसङ्गसम्भावनयाङ्गरागं कुर्वत्योऽप्युत्कण्ठया तल्लेपनं हित्वा आकर्षकस्य प्रेष्ठस्य समीपं ययुः । अन्याः प्रमृजन्त्यः अङ्गोद्वर्तनादिकं कुर्वत्यः । गृहं वा लिम्पन्त्यः प्रमृजन्त्य इति वा पात्रभूषणादि वा प्रमृजन्त्यः । काश्चिल्लोचने अञ्जनेन शोभिते कुर्वत्यः । अनेनावश्यकदेहवेषादित्याग उक्तः । कासाञ्चिद् गमनत्वरावेशवशाद् देहावयवविशेषाऽनुसन्धानाभावमाह ॥ व्यस्तेति ॥ स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्राभरणानि यासां ताः । वल्लभप्राप्तिवेलायां मदनावेशसंभ्रमात् * विभ्रमो हारमाल्यादिभूषास्थानविपर्य्यय इत्युक्तो विभ्रमाख्योऽनुभावोऽयम् । अनेन भगवत्तुष्ट्यर्थं कर्म तदासक्तचेतसामन्यथाकृतमपि फलत्येवेति ध्वनितम् ॥

निवृत्तिपक्षे आगमनप्रकाराकाङ्क्षायामादौ, तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन, सर्वापेक्षा च यज्ञादिश्रुतेरिति श्रुतिसूत्राभ्यां सर्वकर्मणामिव संयोगपृथक्त्वन्यायेन तत्प्रतिपादकश्रुतीनामपि परमात्माभिमुख्यमाह । दुहन्त्य इति । जुहुयाद् यजेद्दद्यादित्यादिश्रुतयस्तत्तत्कर्मफलप्राप्तिं प्रतिपादयन्त्यो दोहं तत्फलं हित्वा तत्प्रतिपादने मुख्यं तात्पर्यं विहायाभिययुः । ब्रह्मणि समन्वयं गन्तुं प्रवृत्ताः । सर्वे वेदा यत्पदमामनन्तीत्यादिश्रुतेः । काश्चित्तु समुत्सुकाः, यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापकर्म न श्लिष्यते तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्त इत्याद्याः श्रुतयः । पयः-

स्थानीयं क्रियमाणं सञ्चितं च कर्माधिश्रित्य तत्परिपाकं तद्भोगपर्यन्तप्रतीक्षानिरासं प्रतिपादयाभियद्युः । तस्य तावदेव चिरं यावन्न विमोक्षे अथ संपत्स्य इत्याद्या, अपराः परिपक्वगोधूमकणान्नस्थानीयं प्रारब्धकर्म अनुद्रास्य भोगं विना तत्क्षयाभावं प्रतिपाद्य, अपरा—सूर्याय जुष्टं निर्वपामि अग्नये जुष्टं निर्वपामीत्याद्यास्तत्तद्धविः परिवेषयन्त्यस्तत्र तात्पर्यं हित्वा, तथा अपरा—अक्षय्यं वै चातुर्मास्ययाजिनः सुकृतं भवति, अपाम सोमममृता अभूमेत्याद्याः, शिशून् अज्ञान्, पयःस्थानीयं कर्मफलमक्षयत्वेन प्रतिपादयन्त्यस्तत्र तात्पर्यं हित्वा । यद्वा, सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस इत्याद्याः, परिवेषयन्त्यः, ऋतं पिबन्तौ सुकृतस्य लोके इत्याद्याः पय स्थानीयं सुकृतफलपानं चेतनकर्तृकं प्रतिपादन्त्यः, काश्चित्, स होवाच प्राणोऽहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्वेत्याद्याः पतीन् स्वर्गादिपतीन् इन्द्रादीन् प्रतिपादयन्त्यस्तत्प्रतिपादनतात्पर्यं हित्वा, काश्चित्तु, यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इत्याद्या अन्यादिकर्तृकाऽशनं प्रतिपादयन्त्यो भोजनं मृत्य्वादिरूपमपास्य तत्प्रतिपादनं विहाय, तथा अन्याः, यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीत्याद्याः, लिम्पन्त्यो लेपनमध्यारोपं प्रतिपादयन्त्यः । अन्या, अथात आदेशो नेति नेति, नेह नानास्ति किञ्चन, अस्थूलमनण्वित्याद्याः प्रमृजन्त्यः प्रकर्षेण मार्ज्जनमपवादं प्रतिपादयन्त्यः। काश्चन, अनीशया शोचति मुह्यमानः, यः सर्वज्ञः सर्ववित् सर्वस्य वशी सर्वस्येशान इत्याद्या, लोचनस्थानीये जीवेशचैतन्ये अञ्जयन्त्य उपाधिमत्तया प्रतिपादन्त्यः । काश्चित्तु, त्वं वा अहमस्मि भगवो देवते, अहं वै त्वमसि, तत्त्वमसि, अहं ब्रह्मास्मीत्याद्याः, व्यत्यस्तत्वाऽऽभरणाः

स्वस्वरूपाच्छादकम्—अहं कर्त्तेत्यादिप्रतीत्यापादकं जीवत्वं वस्त्रस्थानीयम् । ऐश्वर्य्याद्यलङ्कृतिप्रतीत्यापादकमीश्वरत्वमाभरणस्थानीयम् । व्यस्ते व्यतिहारेण प्रतिपादिते वस्त्राभरणे याभिस्ताः । यद्वा व्यस्तौ सम्यक्परिक्षिप्तौ वस्त्राभरणस्थानीयौ आवरणविक्षेपौ याभिस्ताः । वृत्तयोऽपि बहिर्मुखतां विहायान्तर्मुखा जाता इत्यपि द्रष्टव्यम् ॥ ५ ॥ ६ ॥ ७ ॥

ननु, रक्षेत् कन्यां पिता विन्नां पतिः पुत्रस्तु वार्द्धके * अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रिय, इत्युक्तानां रक्षकाणां विघ्नभूतानां सत्त्वे कथं कृष्णान्तिकं ययुरित्याशङ्क्य, त्वयाऽभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्द्धसु प्रभो * इत्युक्तत्वात् कृष्णाकृष्टचेतसां न विघ्नाः प्रभवन्तीत्याशयेनाह ।

ता वार्यमाणाः पितृभिः पतिभिर्भ्रातृबन्धुभिः ॥
गोविन्दापहृतात्मानो न न्यवर्तन्त मोहिताः ॥ ८ ॥

ता इति ॥ तत्र चतुर्विधा गोप्यः पद्मपुराणेऽभिहिताः । तत्र गोपकन्याः काश्चिन्नित्यसिद्धाः । काश्चित्साधनसिद्धाः ।

तत्र नित्यसिद्धा ह्लादिनीशक्तिरूपाः । आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिरिति * ब्रह्मसंहितायामुक्तत्वात् । ह्लादिनी या महाशक्तिरिति * बृहद्गौतमीयाच्च । तथाच सच्चिदानन्दघनः परमात्मा गोपालरूपमसंख्यातगोपालिकारूपं चादाय क्रीडार्थं प्रकटित गोलोके क्रीडति । स चात्र ताभिः सार्द्धमवतीर्णस्ततस्तासां नित्यसिद्धत्वादिकमुच्यते। द्वितीयास्तु काश्चिद् गोपीजनवल्लभोपासनया प्राप्तगोपीभावा गोलोकं प्राप्य भगवता लब्धक्रीडा अत्रावतीर्णाः । काश्चित् सम्प्रति गोकुले एव प्राप्तगोपीभावा-

स्ताः पूर्वोपासनकात्यायिनीव्रताचरणादिसाधनसिद्धत्वात् साधन-सिद्धाः । श्रुत्यादयस्तु सर्वा अपि साधनसिद्धा एव । साधनं च प्रार्थनादि । तदुक्तं बृहद्वामनपुराणे । कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः ❋ कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयः ❋ यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः ❋ भजन्ति रमणं मत्वा चिकीर्षाऽजनिता तथेति ऋषीणां श्रीमद्रामचन्द्रप्रसादाद् गोपिकाजन्मप्राप्तिरुक्ता । पाद्मोत्तरखण्डे, पुरा महर्षयः सर्वे दण्ड-कारण्यवासिनः ❋ दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् स्वविग्रहम् ❋ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ❋ हरिं सम्प्राप्य का-मेन ततो मुक्ता भवार्णवादिति । श्रीमद्राममवलोक्य स्वोपास्यगोपा-लविग्रहं हरिं स्मृत्वा तमेव भोक्तुमिच्छावतां लज्जया तदनुक्तवतां कल्पतरोरिवादत्तापि श्रीरामादभीष्टसिद्धिर्जातेत्यर्थः । सम्भवन्तु सुरस्त्रिय ❋ इति प्राग्भवीयभगवदाराधनलब्धब्रह्माज्ञयावतीर्णत्वाद् देवाङ्गनानां साधनसिद्धता । तत्र, नते सुरेशा ऋषयो नचैत ❋ इत्युक्तत्वात् सुराणामृषीणां च गोपालादिरूपेणावतीर्णत्वाद्देवाङ्ग-नानां स्वपतिभिर्देवैर्विवाहादिकम् । ऋषिचरीणां तु ऋषीणां द-म्पतीरूपेणावतीर्णत्वात् स्वस्वरूपभूतैरेव पतिभिर्विवाहादिकम् । श्रुतीनां कासाञ्चित्तु तत्तत्प्रतिपाद्यार्थैः प्राप्तगोपालरूपैः । भगव-त्प्रतिपादिकानां नित्यसिद्धगोपीनां च स्वसमानमायामयविग्रहाणां गोपैर्मायया प्रकटीकृतैर्गोपैर्वा विवाहादिकं सञ्जातम् । तत्र ऋषि-चर्यो भगवत्प्रतिपादिकाः श्रुतयश्च सर्वा अप्यभिज्ञाः, साधनसिद्ध-गोपीनां देवकन्यानां च मध्ये काश्चिदभिज्ञाः, काश्चिदनभिज्ञा-श्च । नित्यसिद्धानां मध्ये भगवत्सङ्कल्पानुसारेण नरनाट्यमवलम्ब्य काश्चिन्मानिन्यः, काश्चिद्दक्षिणाः । भगवत्स्वरूपप्रतिपादकश्रुतीनां मध्येऽपि अतन्निरसनाऽखण्डार्थां गृहीतमानिनीस्वरूपाः । अन्या-

स्तु गृहीतदक्षिणारूपाः । तत्रैवंभूतानां गोपाङ्गनानां मध्ये काश्चित् पितृभिः, काश्चित् पतिभिः, काश्चिद् भ्रातृभिः, काश्चिद् बन्धुभिः, काश्चित् पुत्रैरित्यपि द्रष्टव्यम् । वार्यमाणा अपि न न्यवर्तन्त यतो गोविन्देन वेदोद्धारकेण गोलोकविहारिणा गवेन्द्रेण प्रेष्ठेन भगवता अपहृत आत्मा अन्तःकरणं यासां ताः । तथाचान्तःकरणाऽऽरूढेन भगवताऽपहृतान्तःकरणानां श्रौत्रं निवारणमकिञ्चित्करम् । प्रवाहपतितनौकायां स्थितस्य तिष्ठ तिष्ठेति निवारणं यथा । ननु भयात् स्वधर्माद्वा ताः स्वान्तःकरणं निरुद्ध्य किमिति न निवृत्ता इत्याशङ्क्याह ॥ मोहिता इति ॥ भगवत्स्वरूपासक्त्युत्कटदशया भयाद्यनुसन्धाननिवर्तकं व्यामोहं गताः । ननु तैः पित्रादिभिः सर्वथा किमिति न निवारिता इति वाऽऽशङ्क्याह ॥ मोहिता इति ॥ तथाच मूर्च्छां मृत्युं वा गन्तुं प्रवृत्ता अतस्तैस्तन्मूर्च्छामरणादिभयान्न प्रसह्य वारिता इति भावः ॥

निवृत्तिपक्षे ताः श्रुतयः पितृपत्यादिस्थानीयैर्वैदिकत्वाभिमानिभिर्वादिभिर्वार्यमाणाः । गोविन्देन वेदैकगम्येन परमात्मना अपहृतात्मानः स्वीकृताभिप्रायाः, न न्यवर्तन्त । यतो मया = प्रमया प्रमायै वा ऊहिताः । वृत्तयोऽपि पित्रादिभिर्विषयैर्वार्यमाणा अपि गोविन्दे निलीनस्वरूपाः, मया प्रमया ऊहिता अनुकूलतर्कवशा न न्यवर्तन्त विषयाभिमुख्यं न प्राप्ताः ॥ ८ ॥

अथ जन्मान्तरेषु मोक्षाभिकाङ्क्षया कृतया गोपीजनवल्लभोपासनया लब्धगोपीभावानामवस्थामाह ॥

अन्तर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः ॥
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥

अन्तरिति॥काश्चिद् गोप्यो मोक्षप्रदभगवत्सङ्कल्पानुसारेणपतिभिर्द्वा-

राणां मुद्रितत्वादन्तर्गृहगता अलब्धविनिर्गमाः कृष्णं दध्युःमरणदशो-पस्थितौ तमेव प्रेष्टं दध्युः।यतो यस्य सर्वदा भावना भवति तदेवान्त-काले ध्यानपथमारोहति । ताश्च सर्वदा कृष्णभावनायुक्ता आस-न्नित्याशयेनाह॥तद्भावनायुक्ताः ॥ नेत्रद्वारान्यत्र चित्तवृत्तिगमनभ-यान्मीलितानि लोचनानि यासां ताः । ध्यानावेशेन मुद्रितनेत्रा इति वा। यद्वा मीलितानि लोजनानीतरज्ञानानि यासां ताः ।केचि-त्तु—काश्चिन्नित्यसिद्धादिगोपीसङ्गभाग्याभावादलब्धप्रेमत्वाददग्ध-कषाया गोपैर्व्यूढा गोपोपभुक्ता अपत्यवत्यो बभूवुः।ताः खलु तदन-न्तरमेव नित्यसिद्धादिगोपीसङ्गभूम्ना कृष्णमङ्गस्नेहोद्रेकात् तासां कृपापात्रीभवन्त्योऽपि कृष्णाङ्गसङ्गायोग्यदेहत्वेन योगमायया सा-हाय्यकरणात् पतिभिर्वारिताः कृष्णमभिसर्तुमक्षमा महाविपद्ग्र-स्ताः पतिभ्रातृपुत्रादीन् स्वप्राणचौरत्वेन पश्यन्त्यो मरणदशाया-मुपस्थितायां सत्यां, यथाऽन्या मात्रादिस्वबन्धुजनं स्मरन्ति तथैव स्वप्राणैकबन्धुं कृष्णं सस्मरुरिति वर्णयन्ति ।

निवृत्तिपक्षे. स एष रसानां रसतमः परमः परार्द्ध्योऽष्टमो यदुद्गीथ इत्याद्या उद्गीथादिरूपान्तर्गृहगता अपि काश्चिद् गोपस्य भगवतः सम्बन्धिन्यः. अलब्धो विशेषेण निर्गमः प्रतिपादनं या-भिस्तास्तस्य परमात्मनो भावनायामुपासनायां युक्ता नियुक्ताः कृष्णं दध्युः परमात्मध्यानं विदधुः । यतोऽविचारेण मुद्रितयथा-श्रुतार्थप्रकाशाः। तथाचोद्गीथादिस्तुतिपरतायां निरुद्धा अपि तत्र न तस्थुरित्यर्थः । वृत्तयोऽपि काश्चिदनन्तप्रियवस्तुरूपगृहान्तर्गता अलब्धविनिर्गमा अपि तत्र कृष्णभावनायुक्ताः कृष्णं दध्युर्मु-द्रितविषयप्रकाशा इति ॥ ९ ॥

तथाच वर्तमानकालीनविरहध्यानाभ्यां पूर्वोपासनया लब्धा-भ्यां स्वाभिसन्धितं फलं प्रापुरित्याह ।

दुःसहप्रेष्टविरहतीव्रतापधुताऽशुभाः ॥
ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥ १० ॥

दुःसहेति ॥ दुःसहो यः प्रेष्ठविरहो महानग्निस्तेन यस्तीव्रस्तापः = कोटिब्रह्मकल्पेषु कुम्भीपाकादिनरकेषु यावद् दुःखं भवेत् ततोऽप्यधिकं भगवद्विरहक्षणमात्रेण जातं दुःखं, तेन धुतानि निर्धूतानि भस्मसात्कृतानि अशुभानि यासाम् । तथाच सर्वपापफलभोगसमाप्तिः । पुण्यक्षयप्रकारमाह । ध्यानेन प्राप्तो योऽच्युतस्य सदैकरसस्य परमात्मन आश्लेषः सम्यगालिङ्गनम् । तदानीं न जारत्वेन आश्लेषः, किन्तु परमात्मत्वेनेति बोधयितुमच्युतपदम् । तेन या निर्वृतिः = सुखं—कोटिब्रह्मकल्पेषु स्वर्गादौ यावत्सुखं भवेत् ततोऽप्यधिकभगवत्संश्लेषे क्षणमात्रेणानुभूतं, तया क्षीणानि मङ्गलानि पुण्यानि यासाम् ।तथाचैवं पुण्यस्यापि क्षयः संपन्नः।केचित्तु—दुःसहेन प्रेष्ठविरहेण यस्तीव्रस्तापस्तेन धुतानि कम्पितानि अशुभानि याभिस्ताः । यासां प्रियविरहतापस्य तीव्रतां वीक्ष्य कोटिब्रह्माण्डस्थवाडवानलमहाकालकूटादिरूपाणि परःसहस्राण्यपि अशुभानि स्वतीव्रताहङ्कारं परित्यत्य पराजयबुद्ध्या चकम्पिर इत्यर्थः । ध्यानेन प्राप्त आगतो योऽच्युतस्तेन तदैवोद्भूतस्य प्रेमपूर्णचिन्मयस्य तादृशस्वभावादिमतो देवस्य य आश्लेषस्तेन या निर्वृतिस्तया क्षीणानि कृशीकृतानि मङ्गलान प्राकृतानि यासां ताः । यासां स्फूर्त्तिप्राप्तेष्टाश्लेषोत्थसुखं वीक्ष्य कोटिब्रह्माण्डगतविषयसुखानिर्विषयब्रह्माऽनुभवसुखसहस्राणि मङ्गलशब्दवाच्यानि क्षीणानि। यदपेक्षया निकृष्टानि बभूवुरित्यर्थ इति वर्णयन्ति । तत्र परमपुरुषार्थत्वेन प्रतिपादितस्य निरतिशयस्य ब्रह्मानुभवानन्दस्य क्षीणत्ववर्णनं, यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः * इ-

त्यादिशास्त्राज्ञानविजृम्भितमिति ॥

निवृत्तिपक्षे—दुःसहो यः प्रेष्ठस्य परमात्मनो विरहः—अत्र परमात्मोपासना नास्तीति केनचिन्निरूप्यमाणस्तेन जातो यस्तीव्रतापस्तेन धुतानि अशुभानि याभिस्ताः । तथा ध्यानेन परमात्मोपाप्त्या योऽच्युताश्लेषस्तेन केनचिद्विदुषा वर्णितेन या निर्वृतिस्तया हेतुभूतया क्षीणानि क्रोडीकारितानि मङ्गलानि याभिः । यद्वा अक्षीणानि न नाशितानि च मङ्गलानि याभिस्ताः । वृत्तिपक्षे स्पष्टोऽर्थः ॥ १० ॥

तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः ॥
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ११ ॥

यत एवमतः सद्यः प्रक्षीणबन्धनाः ॥ तत्क्षण एव प्रकर्षेण क्षीणं प्रारब्धकर्मकृतं बन्धनं यासां तास्तथाभूताः सद्यो गुणमयं देहं जहुः । त्रिगुणमयं स्थूलसूक्ष्मकारणाख्यशरीरत्रयं जहुर्विमुक्ता इत्यर्थः । ननु प्रत्यगभिन्नब्रह्मसाक्षात्काराभावात् कथं तासां मुक्तिरित्यपेक्षायामाह ॥ जारबुद्ध्येति ॥ यद्यपि तासां भगवति जारबुद्धिरासीत् तथापि वस्तुमाहात्म्याद्भगवत्प्रसादो जातः । न हि वस्तुशक्तिर्बुद्धिमपेक्षते । अन्यथा बुद्ध्यापि पीतममृतं यथा । जाते तु भगवत्प्रसादे तमेव प्रत्यगभिन्नपरमात्मानं सङ्गतास्तत्प्रसादलब्धसाक्षात्कारेण तदभिन्नतां प्राप्ता इत्यर्थः । अपिशब्दस्तद्बुद्धिनिन्द्यत्वाभिव्यञ्जनद्वारा वस्तुमहिम्ना तदतिप्राशस्त्यमभिव्यनक्ति । यथा प्रथमं जारबुद्ध्यापि भगवता सङ्गताः पश्चाद्विरहदशायां ध्यानादिना भगवत्स्वरूपं ज्ञात्वा ततः प्रक्षीणबन्धनाः सद्यो विमुक्ता इत्यर्थः । तथाच सर्वमपि निकृष्टमुत्कृष्टसम्बन्धादुत्कृ-

ष्टं भवति । यथा भगवत्सम्बन्धाद्गोपा ब्रह्मादीनामपि दर्शनीयतां प्राप्ताः । तत्कृतं चौर्य्यं कर्म स्मरणादिनाऽप्यनेकाशुभनाशकरम् । तत्सम्बन्धाद्गोवर्द्धनस्येन्द्रादेरप्युत्कर्षः । शान्तिरसादतिनिकृष्टस्य शृङ्गाररसस्य तत्राप्यौपपत्यसम्बन्धिनः सर्वपरमहंसचूडामणिशुकमुखेन गीयमानत्वम्। गुञ्जागैरिकशिखिपिच्छादेर्ब्रह्मादिभिः स्तूयमानत्वं सारथ्यादेः परमाश्रयेक्षणीयत्वं चेति भावः ॥

निवृत्तिपक्षे—तमेव, रसो वै सः रसꣳ ह्येवाऽयं लब्ध्वाऽऽनन्दी भवतीत्यादिश्रुतिप्रतिपादितं परमरसरूपं जारबुद्ध्या तत्च्छ्रुतिपतौ या उपासनाबुद्धिस्तद्विशायकतयाऽपि सङ्गतास्तस्मिन् सङ्गतिमत्यः । अत एव सद्यो विचारक्षण एव प्रक्षीणं बन्धनं श्रूयमाणार्थबन्धनकारणं यासां ताः । गुणमयम् उद्गीथादिगुणस्तुतिमयं देहं तत्परत्वं जहुः।वृत्तिपक्षे जारबुद्ध्यापि सङ्गता गुणमयं देहं यदा जहुस्तदा किमु वक्तव्यं प्रेष्ठबुद्ध्या सङ्गता विवेक्यऽन्तःकरणवृत्तय इति योज्यम् ॥ ११ ॥

ननु तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय, यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ॥ तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति, ऋते ज्ञानान्न मोक्षइत्यादिश्रुत्या ज्ञानस्यैव मोक्षसाधनत्वाभिधानम् । तच्च ज्ञानमहं ब्रह्मास्मीत्यादिरूप, स्वात्मानमात्मात्मतया विचक्षते॥इत्युक्तत्वात् तत्त्वमस्यहं ब्रह्मास्मीत्यादिश्रुतेश्च । तत्साधनं च भक्तियोगः । यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाःप्रकाशन्ते महात्मनः, यमेवैष वृणुते तेन लभ्यः, मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ॥ कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्॥ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ॥ पुरे ह भूमन्

बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया * विबुद्ध्य भक्त्या कथयोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते गतिं परामित्यादिशास्त्रात् । तथाच कृष्णे ब्रह्मबुद्ध्यभाववतीनां जारबुद्ध्या कथं मोक्षः । न हि पतिपुत्रादीनां वस्तुतो ब्रह्मभूतानामपि भजनेन मोक्षो भवतीति शङ्कानिवृत्त्यर्थं राजा पृच्छति ॥

राजोवाच ।

कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने ॥
गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥

कृष्णमिति ॥ कृष्णं परं केवलं कान्तं कमनीयं पतिं वा जारं वा विदुः । यद्वा परं परपुरुषं कान्तं स्वरमणं विदुः । न तु ब्रह्मरूपं विदुः । अतो गुणधियां गुणकार्यविषयाक्रान्तबुद्धीनां गुणप्रवाहस्य संसारस्योपरमो मोक्षः कथम् । मुनिर्भवानेतन्निर्णयं कर्तुं समर्थोऽसीति सूचयन् संबोधयति । हे मुन इति ॥ विषयबुद्ध्यापि मोक्षसिद्धौ श्रवणमननादेर्वैयर्थ्यं स्यादिति वा संबोधनाशयः ॥

निवृत्तिपक्षे कृष्णं सदानन्दरूपं परं कान्तं परमरसं ब्रह्मतया गुणबुद्ध्या न विदुः नावेदयन्ति। अतो गुणमात्रधियां तासां श्रुतीनाम् उद्गीथादिगुणवर्णने यो प्रवाहस्तस्योपरमः कथम् । वृत्तयोऽपि याः कृष्णं ब्रह्मतया न विदुस्तासां गुणप्रवाहोपरमः कथम् । न हि ब्रह्माकारतां विना गुणप्रवाहोपरमो भवतीति भावः ॥ १२ ॥

अहो एवंविधरसवत्यां कथायां प्रतिबन्धकमात्रम् उक्तोत्तरं प्रश्नं करोतीत्यभिप्रेत्य सामर्षमाह श्रीशुकः ॥

श्रीशुक उवाच ।

उक्तं पुरस्तादेतत् ते चैद्यः सिद्धिं यथा गतः ॥
द्विषन्नपि हृषीकेशं किमुताऽधोक्षजप्रियाः ॥ १३ ॥

उक्तमिति ॥ पुरस्तात् सप्तमस्कन्धे उक्तमप्यमुमर्थं पृष्टत्वात् करुणया पुनः स्मारयति। चैद्यः शिशुपालो हृषीकेशं भगवन्तं द्विषन्नपि सिद्धिं गतः। हृषीकाणामिन्द्रियाणामीशं नियन्तारमित्यनेन यथाधिकारं द्वेषादिकं भगवत्प्रेरणयैव भवतीति सूचितम्। यद्वाऽनावृतैश्वर्यं द्विषन्नित्यनेनावृतब्रह्मभावानां जीवानां परस्परं द्वेषादिना सिद्ध्यभावेऽपि कृष्णेऽनावृतब्रह्मभावे यथाकथञ्चिन्मनःप्रवेशे सिद्धिर्भवतीति ध्वनितम्। यथैवं तथा पुरस्तान्मयोक्तम्। तथाच कृष्णे विरोधिवृत्त्यापि यदि सिद्धिर्भवति तर्हि परमानुकूलवृत्त्यासक्तचेतसां गोपीनां सिद्धिप्राप्तौ किं चित्रमित्याह ॥ किमुतेति ॥ अधोऽक्षजः प्रियो यासां ताः। अधोऽक्षजस्य प्रिया इति वा। अधः अक्षजन्यं ज्ञानं यस्मादित्यर्थकेनाधोऽक्षजपदेन, अशब्दमस्पर्शमरूपमव्ययमित्यादिश्रुत्या सर्वगुणातीतम् आवरणविनिर्मुक्तं परमात्मानं जारबुद्ध्यापि सेवन्तीनां या बुद्धयस्ता वस्तुमाहात्म्याद् ब्रह्मबुद्धय एव, न गुणबुद्धय इति ध्वनितम्। सप्तमस्कन्धे चेत्थमभिहितम्। तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा * स्नेहात् कामेन वै पुण्यात् कथञ्चिन्नेक्षते पृथक् * कामाद् द्वेषाद्भयात् स्नेहाद्यथाभक्त्येश्वरे मनः * आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः * गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृप * संबन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभोरिति। यद्वा पूर्वं, ब्रह्मन्! परोद्भवे कृष्णे इयान् प्रेमा कथं भवेत् * योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यतामिति पृष्टवतस्तवैतदुत्तरं तदुत्तरकथनेन मया

उक्तम् । सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः । * इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि * कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् * जगद्धिताय सोऽप्यत्र देहीवाभाति माययेत्यादिना । किञ्च । सप्तमेऽप्यभिहितमित्याह यथा वा ॥ चैद्य इति ॥ निवृत्तिपक्षेऽपि समानमिदं पञ्चश्लोकात्मकं प्रकरणम् ॥ १३ ॥

भक्तितत्त्वज्ञानानधिकारिणोऽप्युद्धर्तव्या इतीच्छयैव भगवदऽवतरणमतो यदर्थं भगवदवतारस्तस्मिन्नेवार्थे भवतः शङ्का न युज्यत इत्याशयेनाह ।

नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ॥
अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥

नृणामिति ॥ भगवतः षड्गुणैश्वर्यसंपन्नस्याभिव्यक्तिकारणरहितस्याभिव्यक्तिः प्रादुर्भावो नृणामविशेषेण सर्वेषां निःश्रेयसार्थाय साक्षात्परम्परया वा मोक्षरूपपरमपुरुषार्थलाभायैव, नतुभूभारभूतकंसादिवधाय । भ्रूविजृम्भमात्रेणानन्तकोटिब्रह्माण्डसंहारसमर्थस्य क्वचित्संहारकशक्तिलेशमात्रावतारेणाऽपि तस्य सुकरत्वात् । न च नृणां निःश्रेयसमन्यथा सुकरम् । भक्तितत्त्वज्ञानयोरधिकारिणोऽत्यन्तदुर्लभत्वात् । मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये * यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इत्यादिवाक्यात् । न च भगवदिच्छया तत्सुकरम् । तस्या अपि जीवकर्मसापेक्षत्वात् । अन्यथा वैषम्यनैर्घृण्यापातात् ।
तस्मात् करुणासागरो भगवान् संसारानले पापच्यमानाञ्जीवानालोच्यावतरतीति भावः । यथा नृपरूपेण भगवतोऽवतरणं नृणां पालनाय, तद्वदिति सम्बोधनाशयः । अनेन जीवेनात्मनाऽनुप्र-

विश्य नामरूपे व्याकरवाणीति श्रुत्या परमात्मनो जीवरूपेण प्रवेशो नामरूपात्मकसंसारविस्तारायोक्तः। प्रविष्टस्य तिरोहितस्य परमात्मनः पतिपुत्रादिरूपेण स्थितस्य संसृतिचक्रारूढस्य स्नेहादिसंबन्धेन संसृतिचक्रे भ्रमणातिशय एव, न तु तन्निवृत्तिः। भगवतस्तु अभिव्यक्तिरित्युक्तमतो यत्स्वरूपसाक्षात्कारेण मोक्षः श्रुतिमस्तकेष्वभिहितस्तत् स्वरूपं भगवति अभिव्यक्तमेवास्तीत्याशयेन भगवन्तं विशिनष्टि ॥ अव्ययस्येत्यादि ॥ अव्ययस्यापक्षयरहितस्य सत्यस्य यतोऽप्रमेयस्य प्रत्यक्षादिप्रमाणजन्यवृत्तिप्रतिफलितचैतन्याऽविषयस्याऽदृश्यस्य दृग्रूपस्य, तत्रापि हेतुमाह, निर्गुणस्य॥ प्रत्यक्षादिप्रवृत्तिहेतुगुणविनिर्मुक्तस्य, सत्यं ज्ञानमनन्तं विज्ञानमानन्दं ब्रह्म विज्ञातारम् अरे केन विजानीयात्, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्, यत्साक्षादपरोक्षाद् ब्रह्म, साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतेः। तथाच सत्यज्ञानानन्दात्मकस्यानावृतस्य परब्रह्मणो नन्दनन्दनादिरूपेणाभिव्यक्तिर्न तु जीवस्येव जडदेहाद्यभिमानेन तिरोधानम्। तस्माद्विषबुद्ध्यापि पीतममृतं यथा अमरत्वायैवावकल्पते तथा जारत्वादिबुद्ध्याप्याराधितो भगवान्मोक्षायैवावकल्पते इति, न कोऽपि विरोधः। ननु यथोक्तस्य निर्गुणस्य परमात्मनो महावाक्यजन्याखण्डार्थवृत्त्या आवरणभङ्गमात्रं सम्पाद्यते। स तु स्वयंप्रकाशत्वात् स्वयमेव प्रकाशते। तस्मात् कथं चक्षुरादीन्द्रियजन्यवृत्तिविषयाकारेणाभिव्यक्तिः। न हि दृश्यमानघटपटाद्याकारं ब्रह्माभिव्यक्तमित्युच्यते। अतो भगवद्विग्रहस्य दृश्यमानत्वमभिव्यक्तब्रह्मरूपत्वं चेत्येतदुभयं विरुद्धमितिचेत् तत्राह ॥ गुणात्मन इति ॥ गुणानां सत्त्वरजस्तमसां तदात्मिकाया महामायादिशब्दप्रतिपाद्यायाः प्रकृतेरात्मनो नियन्तुः सत्तास्फूर्तिप्रदस्याधिष्ठानचैतन्यस्य। तथाच सच्चिदानन्दरूपे परब्रह्मणि सर्वथा-

ऽघटितमप्यज्ञानाहङ्कारादिकं यथा प्रतीयते, तथा साधकाऽनुग्रहार्थं भगवतस्तत्तद्विग्रहरूपेण भानमपि न विरुद्ध्यते । तत्राज्ञानादीनां संसारकारणत्वात् तद्भानं संसारापादकम् । भगवद्विग्रहस्य तु मोक्षार्थं प्रकटितत्वात् तद्दर्शनादिकं मोक्षकरमिति विशेषः । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया * माया ह्येषा मया सृष्टा यन्मां पश्यसि नारदेत्यादिशास्त्रात्स्वेच्छोद्बोधिततद्विग्रहभानानुकूलमायाशक्त्या तथाभूते परमात्मनि तत्तदाकृतिभानमिति सर्वमनवद्यम् ॥ १४ ॥

अतो यथाकथञ्चित् तदासक्तिर्मुक्तिकारणत्वात् सम्पाद्येत्याह ॥

कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा ॥
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ १५ ॥

कामं प्रेममयं रिरंसामयं वा । गोप्यादयः । क्रोधं द्वेषं शिशुपालादयः । भयं कंसादयः । स्नेहं पाण्डवादयः । ऐक्यं सम्बन्धं वृष्ण्यादयः । सौहृदं भक्तिं नारदादयः । ऐक्यमभेदमात्मारामा इति व्याख्यानं तु सम्बन्धाद् वृष्णय इति पूर्वोक्तविरोधादस्य यथार्थत्वेन यथाकथञ्चिद्रूपत्वाभावात् स्वामिभिर्न कृतम् । नित्यं हरौ बन्धहरणायावतीर्णे भगवति विदधतः कुर्वाणा ये ते तन्मयतां सच्चिदानन्दस्वरूपभगवत्स्वरूपतां यान्ति । एवकारेण प्रत्येकं सम्बन्धित्वेन कामादीनां मध्येऽन्यतमस्य यथाधिकारमवश्यकर्तव्यतां बोधयति । वाकारेण कामादीनां तन्मयताप्राप्तौ प्रत्येकं स्वातन्त्र्यं ज्ञापयति । एवकारस्य यान्तीत्यनेनापि सम्बन्धः । तथाच यान्त्येवेत्यैकान्त्यं बोधितम् । नित्यमित्यनेन शूर्पणखादिवद् व्यभिचारित्वकामादिव्यावृत्तिः । यान्तीति वर्तमानापदेशेनेदानीमप्येवं विद-

धतो यान्स्येवेति द्योतयति ॥ १५ ॥

ननूक्तेऽप्यर्थे विस्मयाच्छिष्येण पुनः प्रश्नः क्रियतेऽतः किमिति सामर्ष भवद्भिरुत्तरं दत्तमिति चेदप्रसिद्धे ह्यर्थे उक्तेऽपि कदाचिद्विस्मयवशात् पुनः प्रश्नो भवेदनेकवारमनुभूते समस्तशास्त्रेषु प्रसिद्धे परमात्ममुखात् सम्यक्श्रुते समनस्कस्य विस्मयोऽपि कर्तुमयोग्य इत्याशयेनाह ॥

नचैवं विस्मयः कार्यो भवता भगवत्यजे ॥
योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥ १६ ॥

नचेति ॥ गुणप्रवाहेऽत्यन्तासम्भावनालक्षणो विस्मयो, भवता तु गर्भवासकालादारभ्यैतावत्कालपर्यन्तं भगवन्माहात्म्यमनुभूतवता, अवारितमपि ब्रह्मास्त्रं यो वारितवांस्तस्य स्वेन निवर्तनीयसंसारनिवर्तने कः परिश्रम इति सर्वविस्मयनिवारकजन्मवता जन्मकाले असौ मद्रक्षक इति परीक्षणेन परीक्षिदिति नामवता न च कार्यः कदापि न कर्तव्यः । एवम्भूतो विस्मयस्त्वज्ञानामश्रद्दधानानां संशयाविष्टचेतसां वा भवति, न तद्विलक्षणानां भवादृशानाम् । अज्ञत्वादिकं तु सर्वानर्थकारणत्वाद् दूरतः परिहरणीयम् । तदुक्तम्—अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति * नायं लोकोऽस्ति न परो न सुखं संशयात्मन * इति । तत्रापि भगवति षड्गुणैश्वर्यसम्पन्ने, येन तस्योद्धारो यद्विषयकाङ्क्षया वा तस्य प्रतिबन्धस्तदाविर्भावेन तदाकाङ्क्षापूर्त्या वा मोचनसमर्थे । अत एवाऽजे जन्महेत्वऽविद्याकामकर्मवासनादिविनिर्मुक्तत्वाज्जन्मशून्ये, लोकानुग्रहायाविर्भूतत्वाद्दिव्यजन्मादिसत्त्वेऽपि नास्याजत्वादिव्याघात इति भावः। किञ्च, योगेश्वरेश्वरे॥योगेश्वरा ब्रह्मादयस्तेषामपीश्वरे आदिकारणे नियन्तरि स्वाजत्वमहेश्वरत्वादिज्ञानवतोऽपि मुक्तिप्रदे । तदुक्तम्—

अहमादिर्हि देवानां महर्षीणां च सर्वशः * यो मामजमनादिं च वेत्ति लोकमहेश्वरम् * असम्मूढः, स मर्त्येषु सर्वपापैः प्रमुच्यत इति। यद्वा, यत्प्रसादाद्योगेश्वरा अपि मोक्षदानक्षमास्तेषामीश्वरे को विस्मयः। एवं त्रिभिः पद्यैर्मोचनसामर्थ्यमभिधाय, किञ्च मुक्तप्राप्योऽपि स एवेत्याह ॥ कृष्णे सदानन्दस्वरूपे यतो येन केनापि प्रकारेणाश्रिताद्देतच्चराचरं सर्वमपि विमुच्यते ।

तथाच लुप्तस्वर्ग्ये, प्रादुर्भूतजन्माद्यनर्थसमूहे, स्वस्यापि मोक्षोपाययोगादिशून्ये, आच्छन्नसदानन्दस्वरूपे, अनृतजडदुःखदेहादितादात्म्यापन्ने जीवेऽस्त्वेवं विस्मयो, न तु यथोक्ते परमात्मनि, तत्रापि भवत इति भावः ॥ १६ ॥

अहो बहूक्तम्, इतः परम् अलं प्रश्नोत्तराभ्यां लोकोत्तरसुखाया भगवद्रासक्रीडाकथाया विच्छेदकाभ्यामिति ध्वनयन् स्वयमेव प्रकृतमनुसरति ।

ता दृष्ट्वाऽन्तिकमायाता भगवान् व्रजयोषितः ॥
अवदद् वदतां श्रेष्ठो वाचः पेशैर्विमोहयन् ॥ १७ ॥

ता इति ॥ ताः स्वयं कलगीतेनाहूताः, अतो व्रजयोषितो व्रज एव वासयोग्या अपि झटिति स्वसमीपमागता उपलभ्य । यद्वा ता व्रजयोषितः सर्वदा व्रज एवोपलब्धास्तदानीं स्वस्य वने स्थितस्यान्तिकमायाता दृष्ट्वा, वाचः पेशैर्विलासैः स्वचित्तानुसारेण निषेधप्रार्थनार्थप्रतीतिजनकैः पूर्वं कलगीतेन मोहिताः पुनर्विशेषेण मोहयन् अभाषत । यतो वदतां सर्वेषां वक्तॄणां मध्ये श्रेष्ठः । यतो भगवान् । इदं च व्यामोहोत्पादनं विशेषरसोद्भवाय। तथाच याः स्वात्मानं धैर्य्याभावाद् बहिरपि प्रार्थयन्ति तासां प्रेम्ण उपेक्षावाक्यैरत्रोद्दीपनं भवति । यास्त्वन्तरतः प्रार्थनावत्योऽपि धैर्यव-

शान्मानवस्रो बहिर्नेति नेतीसेव वदन्ति तासां प्रेम्णः प्रार्थनात्वाक्यै-रेवेसनसन्त्रेणोभयार्थवाक्यान्यभिहितवान् । पृथग् यथोक्तार्थवाक्यप्रयोगस्य परस्परकलहापादकत्वेन रसाभासकत्वात् । यद्वा सर्वत्रापिशब्दान्तर्भावेनेत्थं व्याख्येयम् । व्रजयोषितः साहजिकप्रेमवत्योऽपि, ताः प्रेममयकामविकारं प्राप्ता अपि, अन्तिकमायाता अपि, साक्षाद् दृष्ट्वापि, स्वयं भगवाँस्तासां भावज्ञोऽपि, कपटवाक्यैर्व्यामोहयन् वैकल्यं प्रापयन्नवदत् । यतो नर्मोक्तिवादिषु श्रेष्ठः । तथाच नर्मविशेषार्थमेवमभाषतेत्यर्थः ।

निवृत्तिपक्षे भगवानेव वदतां श्रेष्ठस्तत्तद्वादिरूपेण वदतामग्रगण्यः सन् वाचः पेशैरापातरम्यैर्विलासैः, विप्रया = विरुद्धप्रमया विपरीतसिद्धान्तेन ता ऊहयँस्तर्कयन्नुवाचेत्यर्थः । मोहितान् मन्दमतीन् विशेषेण मोहयन्निति वा ॥ १७ ॥

यदवदत् तदुदाहरति ।

स्वागतं वो महाभागाः प्रियं किं करवाणि वः ॥
व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणम् ॥ १८ ॥

स्वागतमिति॥ तत्र त्रिविधा गोप्यः।स्वावतारं विज्ञाय रमणाभिलाषवत्योऽभिज्ञाः प्रथमाः । जारबुद्ध्या तद्वत्योऽनभिज्ञा द्वितीयाः । स्वप्रेमातिरेकेण वशीकृतप्रेष्ठा मानवत्यस्तृतीयाः । तत्राभिज्ञापक्षे, वो युष्माकं स्वागतं सुष्ठु शोभनमागमनं जातम् । प्रेष्ठसन्निधावागमनमात्रस्याप्यसन्तशोभनत्वात् । यद्वा, स्वागतमिति कुशलप्रश्नः । अतः परमप्रेम्णा समागतानां युष्माकं प्रसन्नोऽहं किं प्रियं करवाणि । युष्मन्मनोऽभिलषितप्रियकरस्तेन भवतीनां सन्तोषस्य सम्पादनीयत्वात् । अहो रमणेच्छयाऽऽराधनपराणामस्माकं मन्दभाग्यत्वादद्यापि सर्वज्ञेनाप्यभिप्रायो न बुद्धो यत एवं

पृच्छति । यद्वा । अस्मत्प्रेमभरतामालोच्यैवं वदति तस्मादतः परं किं वक्तव्यमिति विचार्य्य खिन्नचित्ता आलक्ष्याऽऽश्वासयति । हे महाभागाः । महद्भाग्यं भवतीनाम् । यतो ब्रह्मादिभिरपि प्रार्थनीयं मत्सन्निधानं लब्धवत्यः । यद्वा, महान् भागो भजनं यासाम् । मत्प्रेमातिरेकाविनिर्मुक्तानां कथं मत्सम्बन्ध इति भावः । एवमुक्ता अपि वक्तुमशक्ता व्रजाभिमुख्यः स्थिता दृष्ट्वा पुनराह ॥ व्रजस्येति ॥ व्रजस्थसम्बन्धिजनस्योपद्रवोपस्थितौ भवतीनामागमनं जातं स्यादिति मया ज्ञातमतः पृच्छामि । व्रजस्य कच्चिदनामयमुपद्रवाभावः संप्रति वर्तते । एवं श्रुत्वा अहो सर्वज्ञोऽपि भगवान् अज्ञवत् पृच्छतीति नरनाट्यमालक्ष्य विस्मयेन मन्दस्मितवतीरुपलभ्य स्वयमपि मन्दहसितालंकृतमुखसरोरुह आह ॥ ब्रूतेति ॥ आगमनकारणं ब्रूत । किमिह तूष्णीमवस्थानेन सन्देहापादकेन । स्वाभिप्रेतप्रियप्रार्थनप्रतिबन्धकलज्जाभिभवकारणप्रेमातिरेकसंपादनार्थं भगवता ताः प्रत्येवमुक्तम् । अनभिज्ञापक्षे, स्वास्मिन्नासक्तचित्ता अस्मत्कलगीतश्रवणसमकालमेव व्रजाद् बहिर्निःसृत्य स्वसन्निधौ समागता, अत एव तासामन्तःकरणस्थो भावोऽपि बहिर्निःसारणीय इत्याशयेन दाक्षिण्यलक्षणनायकस्वभावं ता ग्राहयितुमवहित्थालक्षणनायिकास्वभावमङ्गीकृत्य आह ॥ स्वागतमिति ॥ वः शोभनमागमनं भवतु । युष्मदागमनं स्वस्य शुभसूचकमहं लक्षये । यतो, हे महाभागा महद्भाग्यलब्धो महान् भागः स्वपतिभजनं यासां ताः पतिव्रताः।तथाच महाभागानां युष्माकमागमनं महद्भाग्यं सूचयतीति भावः । अत आज्ञापयन्तु भवत्यो, वः प्रियं किं करवाणि। केन प्रियाचरणेन स्वात्मानं कृतार्थं करोमीत्यर्थः। एवं विपरीतमाकर्ण्योद्विग्नमानसाः शुष्यन्मुखारविन्दा, अहो वृथैव व्रजात् सहसा निःसृत्यात्र समागता इति पश्चात्तापेन व्रजाभिमुखीरुपलभ्याह ॥

व्रजस्येति॥यदि व्रजस्य कश्चिद् उपद्रव उपस्थितस्तच्छान्त्या च युष्मत्प्रियं भवति तर्हि वक्तव्यम् । झटित्येव तच्छान्तिं करोमीति भावः । ननु भोः, चतुरशिरोमणे, तथा सति गोपा आगताः स्युरितिचेत् तत्राह ॥ ब्रूतेति ॥ युष्मदागमनेन तत्रस्त्रीणामेव कश्चिदुपद्रव उपस्थित इति तर्कवशान्मयैवमुच्यतेऽतः स्वमुखादपि झटिति तत्कारणं ब्रूत । अहो एतत्स्वरूपासक्तचित्ताभिरस्माभिर्व्रजस्य दत्तं जलाञ्जलिं जानन्नपि फलकाले किमस्मासु व्रजासक्तचित्ततामारोप्यैवं वदतीति स्वमुखारविन्दाभिमुखीरलोक्याह—ब्रूतेति, वा । तिष्ठतु मदुक्तस्तर्कः, स्वयं वक्तुमुद्यता यूयं स्वमुखादेव स्वागमनप्रयोजनं ब्रूतेत्यर्थः । यद्वा, ससम्भ्रममाह ॥ स्वागतम् ॥ यतो भवत्यः पतिपुत्रादिसकलसम्पत्सम्पन्नत्वेन महाभागाः । तथाभूतानामागमनावकाशरहितानामत्रागमनेन महान् ममातिविस्मयो जात इति भावः । तस्माद् युष्माकं किञ्चित्प्रियाचरणे मम महत्युत्कण्ठा जातेत्याशयेनाह॥प्रियमिति॥यत्प्रियं भवत्यः प्रार्थयन्ति तदहं करवाणीत्यर्थः॥एवमुक्ता नर्मोक्तिमबुद्ध्वा लज्जया स्वाभिलषितं प्रियं प्रार्थयितुमशक्ता व्रजाभिमुखीरवलोक्याह—ज्ञातं मया, व्रजे कश्चिदुपद्रव उपस्थितः स्याद् यद्भयात् पलाय्य स्वत्राणार्थं मदन्तिकमागता अतः पृच्छामीत्याशयेनाह ॥ व्रजस्येति॥ तथाच तत्र सम्भावितोपद्रवशान्तिरूपं प्रियं किं करवाणीति भावः । एवमुक्ता अहो अस्य धूर्ताधिराजस्यात्राऽपूर्वोऽयं वाग्विलासो द्रष्टव्य इति तर्कयन्तीः सस्मितं परस्परं विलोकयन्तीरालक्ष्याह ॥ ब्रूतेति ॥ अहो भवतीनां मौनेन मिथः सस्मितनिरीक्षणेन चोपद्रवाभावोऽस्तीति मया ज्ञातमतः स्वमुखादेवागमनप्रयोजनं ब्रूतेत्यर्थः । मानिनीपक्षे, ता दुर्लभदर्शनसंभाषणाः स्वान्तिकमायाता दृष्ट्वा अतिविस्मितस्वान्तः सोत्कण्ठमाह ॥ स्वागतमिति ॥ अहो वो युष्माभिः

सुष्ठु समीचीनमागमनं कृतम् । एतादृशचन्द्रकराभिरञ्जिते समस्तोद्दीपनसामग्रीविशिष्टे वने युष्मदागमनाकाङ्क्षया मदवस्थानात् । ननु किमित्येवं ब्रवीषि, मन्दभाग्यप्रेरिता वयमत्र समागता इति कदापि न वाच्यमित्याह ॥ हे महाभागाः ॥ एवंविधयौवनादिवतीनामेवंविधे वने एवंविधेन प्रियेण समागमो महता भाग्येन लभ्यतेऽतो नाल्पस्य तपसः फलमिति भावः । अहो नाऽयङ्कोपकालः, किन्तु कोपौदासीन्यादिकं विहाय रमणस्य समयोऽतो येन प्रियाचरणेन भवत्यः प्रसन्ना भवन्ति तत्किं वर्तते तदहं करोमीति दैन्यं व्यज्यते । यद्वा, किमेवंमुद्रयाऽत्रस्थिता, यद्युष्माकं मनसः प्रियं तदहं जानामि, तदेव च ममापि प्रियं, तद्वः प्रियं देशकालानुकूल्ये सति किं करवाणि । भवतीनामनुज्ञा वर्तते किमिति ससंभ्रमोक्तिः । एवमुक्त्वा व्रजाभिमुखीरवलोक्य तासां पलायनं संभाव्याह ॥ व्रजस्येति ॥ अहो प्रियाः ! प्रियाचरणानुज्ञा किमिति न दीयते, किमर्थं वा विकासितमुखपद्मा भवत्यः पुनर्व्रजमवलोकयन्त्यस्ऽतोऽहं पृच्छामि । व्रजस्य तु काच्चिदनामयम् । एवमुक्ताः किञ्चिद्विकसितवदना ईषत्कटाक्षवतीरवलोक्य सस्मितमाह ॥ ब्रूतेति ॥ आगमनप्रयोजनं झटिति ब्रूत । प्रार्थनायां लोट् । किं वा वदिष्यन्तीति भयान्मद्धयकम्पमपाकुरुतेति दैन्यं व्यज्यते । सम्प्रत्यभीप्सितकार्यनाशकरीं लज्जां विहाय कथयतेति भावः ॥

निवृत्तिपक्षे, आस्तिको भूत्वा वदति ॥ स्वागतमिति ॥ वः श्रुतीनां सुष्ठु आगतम् आगमनं भवति । यतो भवत्यो महाभागाः प्रमाणमूर्द्धभूता अतो युष्माकं किं प्रियं करवाणि । अभिधेयं किं धर्मः, किं वा ब्रह्म । तदपि किं सविशेषमुत निर्विशेषम्, एकमनेकं, कर्मप्राप्यमुपासनाप्राप्यमुभयप्राप्यं केवलज्ञानप्राप्यं, कर्मसमुच्चितज्ञानप्राप्यं वा प्रतिपादयामि । ननु यथाकथञ्चित्प्र-

त्किञ्चित्प्रतिपादने को दोष इत्याशङ्क्याह ॥ व्रजस्यापौरुषेयस्य वेदस्यानामयं कच्चिचत् । दोषगन्धोऽपि न सम्भाव्यते । पौरुषेयवाक्येषु तथा चेदस्तु नामेति भावः । नन्वागता एव परब्रह्मणि वयमतः किमित्येवं पृच्छसीत्याशङ्क्याह ॥ ब्रूतेति ॥ स्वागमनवतीनां युष्माकमागनकारणं विनाऽऽगमनं नोचितमिति कृत्वा तस्य कारणं जातिगुणसञ्ज्ञान्यतमं ब्रूतेत्यर्थः ॥ १८ ॥

एवमुक्ता, लज्जातिक्लिष्टमानसाः किञ्चिदपि वक्तुमक्षमा अवलोक्य प्रेमोद्दीपनार्थमीषत्कर्णकठोरं वाक्यमाह ॥

रजन्येषा घोररूपा घोरसत्त्वनिषेविता ॥
प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥ १९ ॥

रजन्येषेति ॥ युष्माकं मौन्येन कारणाभावो मया ज्ञातः । अकारणं चागमनमुन्मत्तचेष्टितसमम् । तस्माद् वृथाऽऽगमनवदत्रावस्थानस्यानुचितत्वादिह वने न स्थेयम् । यज्जातं तत्तु जातमिति माऽस्तु वृथा चेष्टितमिति भावः । तर्हि किं चेष्टितमित्यपेक्षायामाह ॥ व्रजं प्रति यात गच्छत। गत्वा गृहकृत्यपरता सम्पाद्येति भावः । व्रजमित्यनेनात्रागमनवदन्यत्र गमनस्यापि निष्फलत्वं सूचितम् । ननु भवतु क्षणमात्रं स्थित्वा गमिष्याम इतिचेत् तत्राह ॥ रजनीति ॥एषा उपलभ्यमाना । तथाच सम्यग् नेत्राण्युन्मील्य द्रष्टव्या, एषा रजनी वर्तते, न तु दिनम् । दिनादौ विलम्बेऽपि कृते उत्तरोत्तरप्रकाशबाहुल्यसम्भवान्नास्ति बाधा, रजन्यां तूत्तरोत्तरान्धकारबाहुल्यसम्भवाद्विलम्बो नोचित इति भावः । किञ्च ज्योत्स्नाबहुलाऽपि घोररूपा रात्रित्वादेव । तथाच महानिशीथाऽऽगमे गमनमत्रावस्थानं च दुर्घटं भविष्यतीति भावः । ननु भवत्वेवं तथाप्यकस्मादागताः फलमूलादिकं किञ्चिदादाय

यास्याम इति चेत् तत्राह ॥ घोरसत्त्वैर्व्याघ्रसर्पवृश्चिकादिभिर्नि-षेविता । कालसम्बन्धाद् वृन्दावनेऽपि घोरसत्त्वसम्भावनयात्राव-स्थानं विहरणं वा नोचितमिति भावः । नन्वेवं तर्हि भवताऽपि किमर्थमत्रावस्थीयते, व्रज एव चलनीयमितिचेत् तत्राह ॥ स्त्रीभि-रिति ॥ तत्रापि हेतुः ॥ सुमध्यमाः ॥ सुकुमारमध्यभागा भयोप-स्थितौ पलायनादावसमर्थाः । अत एव कोमलचित्तत्वाद् घोरस-त्त्वं द्रष्टुमप्यक्षमाः । एतेन तव सन्निधौ नास्त्यस्माकं किञ्चिद् दुःखमिति शङ्कापि निरस्ता । अनभिज्ञापक्षे एतच्छ्रुत्वा, अहो द्र-ष्टव्यं धूर्ताधिराजस्य वाग्विलासचातुर्य्यं, लोकोत्तरसौन्दर्य्यक्रीडा-दिकं दर्शयित्वा धैर्य्यकुललज्जादिकं नाशयित्वा सम्प्रति कल-गीतेन स्वयमाहूय कारणं पृच्छतीत्यपाङ्गचालनैरेव परस्परमाच-क्षाणासु तासु अहो मया बुद्धं, देवपूजोपयोगिपुष्पाद्याहरणाय भव-त्यः स्वागताः स्युरतस्तथाचेच्छृणुतत्राह ॥ रजन्येषेति ॥ भोः, चतुर-शिरोमणे! किमेवमागमनकारणं पृच्छसि । भवानिव वयमपि क्री-डार्थं वने समागता इति छन्नाऽवस्थानपरा आलक्ष्याह ॥ रज-न्येषा घोररूपेति ॥ भो विशालनेत्रा, नेदं दिनम् । अत एवंवि-धायां रजन्यां कुलवधूनां युष्माकं प्रासाद एव क्रीडोचिता, न तु बहिरागत्य वने । ननु घोररूपायां रजन्यां प्रासादेऽपि क्रीडा कथं स्यादितिचेत् तत्राह ॥ इह, वने एव घोररूपा, न तु व्रजे। सहाय-बाहुल्यादिति । ननु भोः कमलनयन ! एवंविधज्योत्स्नावत्त्वेन उपलभ्यमाना रजनी किमिति घोररूपेत्युच्यते त्वयेतिचेत् तत्राह ॥ घोरसत्त्वनिषेविता ॥ अतो व्रजं प्रतियात । अहो भवतु, क्ष-णमात्रं विश्रम्य यास्याम इतिचेत् तत्राह ॥ नेति ॥ अवश्यकर्त-व्ये विलम्बो न युक्त इति भावः । ननु भवता कथं स्थीयते इतिचेत् तत्राह ॥ स्त्रीभिरिति ॥ ननु बह्वीनामस्माकं तव सन्निधौ

स्थितानां का भयसम्भावनेतिचेत् तत्राह॥सुमध्यमा इति ॥ यद्वा, ननु त्वमेव भीरुरसि, न तु वयम् । वनमपि साधारणं, न तु तव पित्रा पितामहादिभिर्वा मौल्येन क्रीतम् । अतो वयमत्रैव विहरिष्याम इति चेत् तत्राह ॥ नेति ॥ भवतु, यथेष्टं विहरन्तु भवत्यः, परन्तु रहो मत्पार्श्वे न स्थेयम् । आबालब्रह्मचारिणा मया स्त्रीसङ्गस्य परिहृतत्वात् । तत्रापि बालवृद्धाभिः सहावस्थाने नास्ति दोषः । यूयं तु युवतयः सुन्दर्यश्चातो दूरतः परिहरणीया इत्याशयेनाह ॥ सुमध्यमा इति ॥ तथाच सुन्दरीणां युवतीनां सुन्दरेण मया रात्रौ निर्जने वने सहावस्थानं नोचितम् । यद्यपि यूयं परमपतिव्रता, अहं च ब्रह्मचार्य्यग्रगण्यो जितेन्द्रिय एवाऽतः सहावस्थानेऽपि नास्ति विकारशङ्का, तथापि मनसोऽविश्वसनीयत्वादपकीर्त्युद्भवाच्च नेदमुचितमिति भावः । यद्वा। अत्रागमने भवतीनां प्रयोजनमहं न पश्यामि । पृष्टेऽपि तूष्णीम्भावाद् भवत्योऽपि न पश्यन्त्यतो यद् ब्रवीमि तत् कुरुध्वमित्याशयेनाह॥ रजनीति ॥ सम्प्रति व्रजं प्रतियात । यत एषा, दिवा तत्तद्व्यापारवशादलब्धावसरयोर्दम्पत्योः सुखजनकत्वेन बहुशोऽनुभूयमाना रजनी रञ्जनकरी वर्तते । ननु यद्येवं तथापि रजन्यां गन्तुमशक्ता इतिचेत् तत्राह ॥ अघोररूपा ॥ शरत्पूर्णचन्द्रचन्द्रिकया व्याप्तत्वाद् दिनसादृश्यमापन्ना । अतो नास्ति भयसम्भावनाऽपीत्यर्थः । ननु रात्रौ निर्जने वने व्याघ्रादयो यदि स्युस्तर्हि किं कुर्म इति चेत् तत्राहाऽघोरसत्त्वैर्भ्रमरकोकिलादिभिरेव निषेविता, वृन्दावनमाहात्म्यान्न तु घोरसत्त्वैर्व्याघ्रादिभिरित्यर्थः । किञ्च पतिभिः सार्द्धमत्र स्थितौ नास्ति क्षतिरित्याह ॥ नेति ॥ स्त्रीभिः पतिविरहिताभिरिह निर्जने वने तत्रापि मत्पार्श्वे केवलानामत्र परपुरुषसन्निधाववस्थानस्य सुखहान्यपकीर्त्यादिकरत्वात् । मम त्व-

ऽवित्राहितस्य पुरुषस्य यत्र कुत्रापि स्थितौ नास्ति काचित् क्षतिरित्यपि, स्त्रीभिरित्यनेन ध्वनितम् । ननु एकस्यां रजन्यां वियुक्ता एव स्थास्यामस्त्वं कस्मादस्मान् दृष्ट्वा ग्लायस इति चेत् तत्राह ॥ हे सुमध्यमा इति ॥
अहो क्षणान्तरे को वेद किं भविष्यति, एवंविधं सौकुमार्य्यादिकं वृथा न क्षपणीयम् । ममापि भवतीनां सौन्दर्य्यादेर्वृथा नाशसम्भावनया दया ग्लानिर्भवतीति भावः । मानिनीपक्षे, अथैवमुक्ता व्रजं प्रति गन्तुमुद्यता आलक्ष्याह ॥ रजनीति ॥ अहो आगमनकारणं लज्जादिना नोच्यते चेत् तर्हि मा ब्रूत तथापि व्रजं प्रति तु न यात । अत्रापि प्रार्थनायां लोट् । कुत इत्यत आह ॥ एषाऽनुभूयमाना रजनी रञ्जनकरी । एवंविधा पुनर्मिलिष्यति न वेति भावः । यतो ज्योत्स्नाव्याप्तत्वादघोररूपा । पुनश्च क्रीडोपकरणभूतैरघोरैर्भृङ्गमृगादिभिर्नितरां सेविता । यद्वा घोरं सत्त्वं बलं यस्य तेन मया निषेविता । अतो नास्ति भयसम्भावनाऽपीति भावः । यद्वा पित्राद्यागमनभयाविष्टमानसा वयं कथं न याम इतिचेत् तत्राह ॥ घोररूपा ॥ रात्रित्वात् । पुनश्च घोरसत्त्वनिषेविता, तस्मादत्र कोऽपि नायास्यतीति भावः । अतः सर्वशङ्का विहायेह मत्पार्श्वे स्थेयम् । यतः, स्त्रीभिः । स्त्रीणां हि एवंविधे देशे काले चैवंविधरमणसंनिधाववस्थानं बहुयोग्यमिति भावः । तत्रापि न स्त्रीमात्रस्य अपि तु युष्मद्विधानामित्याशयेनाह ॥ हे सुमध्यमा इति ॥

निवृत्तिपक्षे, ब्रूतागमनकारणमित्युपक्षिप्य कारणाभावमुपपादयति ॥ रजनीति ॥ एषा अद्वैतवाद्यभिमता निर्विशेषा चित्, रजनी रात्रितुल्या । सर्वस्यापि तत्राध्यासात् । अत एव घोरं सर्वविशेषविनिर्मुक्तत्वादत्यन्तशून्यारण्यवदत्यर्थभयङ्करं रूपं यस्याः सा । अत एव घोरं स्वपरात्यन्तदुःखकरं सत्त्वं बलमन्तःकरणं

वा येषां सर्वनिषेधप्रतिपादनपराणां तैर्नितरां सेविता । अतो व्रजं प्रति यात बहुवेदवाक्यानुसरणं कुरुत । इह निर्विशेषाचिति प्रतिपादकतया न स्थेयं, स्त्रीस्थानापन्नाभिः श्रुतिभिः । यतो हे सुमध्यमाः! शोभनार्थप्रतिपादनेन सुन्दर्य्यः । अयं भावः । ब्रह्मणि वेदान्ता न प्रमाणम् । तत्र तत्प्रामाण्यस्याशक्यनिरूपणत्वात् । तथाहि । ब्रह्म मानान्तरगम्यं न भवति, किं वा भवति । नाद्यः । मानान्तराविषयत्वयोग्य एव सिद्धे शब्दप्रवृत्तिदर्शनात् । न द्वितीयः । वेदान्तप्रतिपाद्ये ब्रह्मणि मानान्तरानुपलब्धेः । ननु लोकेऽपि न वाक्यार्थे मानान्तरापेक्षा । वाक्यार्थस्य सर्वत्रापूर्वत्वात् । सिद्धबोधि वाक्यमपि न स्वार्थप्रमितौ तदभावशङ्कानिवृत्तये वा मानान्तरमपेक्षते, किन्तु वाक्यस्य वक्तृदोषप्रवृत्ताप्रामाण्यशङ्कानिवृत्तये ब्रह्म त्वऽपौरुषेयवेदान्तलक्ष्यमखण्डसद्वाक्यार्थ एवातस्तल्लक्षकवेदान्तानां न मानान्तरापेक्षा । अतः कथं ब्रह्मणि वेदान्तानामप्रामाण्यमितिचेन्न । अखण्डार्थत्वस्य लोकवेदयोरसिद्धत्वात् । न हि नानापदार्थसंसर्गविषयस्य वाक्यस्यैकप्रातिपदिकार्थविषयत्वं सम्भवति । वाक्य हि अभिधां, गौणीं, लक्षणां वा वृत्तिमादाय स्वार्थं बोधयतीति प्रसिद्धम् । नचास्वन्यतमयापि वृत्त्या वेदान्ता अखण्डमर्थं बोधयन्ति । मुख्यवृत्त्या पदानामेकार्थवृत्तित्वानुपपत्तेः स्पष्टत्वात् । गौणीलक्षणयोः स्वीकारेऽप्यन्यतरपदवाच्यार्थाल्लक्ष्याद्वा अधिकयोर्लक्ष्यमाणगुणान्यतरपदवाच्यार्थयोः सत्त्वाद्वाक्यार्थस्यैकपदार्थमात्रवृत्तित्वासिद्धिः । ननु पदद्वयेऽपि लक्षणाङ्गीकाराल्लक्षणापक्षे नास्ति दोष इति चेन्न । अर्थभेदाभावे पदानां पर्यायत्वादाकाङ्क्षादेरभावाद्वाक्यत्वभङ्गापत्तेर्वाक्यवैयर्थ्यापत्तेश्च । ननु वाच्यार्थभेदान्न पर्यायता । वाक्यस्य पदानतिरिक्तत्वेऽपि प्रमितिजनकत्वेनार्थवत्त्वात् । नापि वाक्य-

वैय्यर्थ्यमिति चेन्न । वेदान्तानामनुदितानस्तमितचैतन्यमात्रस्वरूप-परब्रह्मविषयप्रमितिजनकत्वाङ्गीकारेऽविषयसिद्धान्तभङ्गापत्तेः । प्र-माणवैफल्याच्च । तस्मान्न श्रुतिमस्तकप्रतिपाद्यत्वविवाद इति॥२९॥

ननुभवत्प्राप्तीच्छया समागतानां भवद्गीतादिनोद्दीपितस्मराणां विलम्बसहनाक्षमाणां स्वभक्तानामस्माकं त्यागो नोचित इति चेत् तत्राह ॥

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ॥

विचिन्वन्ति ह्यपश्यन्तो मा कृध्वं बन्धुसाध्वसम् ॥ २० ॥

मातर इति ॥ कासाञ्चिन्मातरः, कासाञ्चित् पितरः, कासाञ्चित् पुत्राः कासाञ्चिद् भ्रातरः, कासाञ्चित् पतयः सर्वे गृहे अपश्यन्तो विचिन्वन्ति मृगयन्ते, न त्वन्वेषणान्निवृत्ता अतो मात्रादिष्वेकोऽपि यद्यागत्य मत्पार्श्वे युष्मान् पश्येत् तदोभयेषां भयलज्जे स्यातामतो-ऽत्र स्थित्वा बन्धुभ्यः स्वस्य भयं, बन्धूनां मम चाऽपकीर्तिभयं च मा कुरुताऽतो बन्धूनां साध्वसपरिहाराय व्रजं प्रति यात, अन्यत्र वा चलत । तथाच संभवस्ति भवतीनां प्रतिबन्धकमतो मम को दोष इति भावः ।

अनभिज्ञापक्षे, ननु नास्त्यस्माकं किञ्चिदपि भयं समुदायनिविष्टत्वा-द् भवत्समीपस्थत्वाच्च । नाप्यपकीर्तिभयम् । संघश आगतत्वाद-ऽज्ञातस्थाने स्थितत्वाच्चेति चेत् तत्राह ।। मातर इति ।। भवतीनां नियामिका युष्मान् गृहेष्वदृष्ट्वा विचिन्वन्ति । अतस्तासां साध्वसं मा कृध्वम् । ननु ता अप्येवंविधा एवातः स्त्रीत्वाद्वा नागमिष्यन्ती-तिचेत् तत्राह॥ पितर इति ॥ ते स्वकुले कलङ्कपातशङ्कया विचि-न्वन्त आगमिष्यन्तीत्यर्थः । ननु ते ऽपि नागमिष्यन्ति, संघश आ-गतास्वस्मासु शङ्कानुत्थानात् । स्त्रीस्वभावस्य तैरपि ज्ञातत्वाच्चेति-चेत् तत्राह । पुत्रा इति । पुत्राणां रक्षणाग्रहे महती लज्जा वर्तते

इति भावः । ननु ते बाला इति चेत् तत्राह ॥ भ्रातर इति ॥ ते ह्यन्वेषणे समर्था लज्जावन्तश्चातस्ते अदृष्ट्वा लज्जया कदाचिच्छरीरमपि त्यजेयुरिति भावः । ननु तरुणास्ते वयं च तरुण्योऽतो लज्जयान्वेषणार्थं नागमिष्यन्तीति चेत् तत्राह ॥ पतय इति ॥ यद्वा, ननु रात्रौ पतिसन्निधौ स्थितिसम्भवानया तेऽन्वेषणाय न प्रवर्तन्त इति चेत् तत्राह ॥ पतय इति ॥ते रात्रौ भोगापेक्षा भवन्त्यतोऽदृष्ट्वा अन्वेषयन्तोऽत्रागमिष्यन्ति । तस्मात् तदीयो रसोऽन्यस्मै न देयः । भोगसिद्धेस्तत एव सुकरत्वादिति भावः । नन्वेवं तर्हि ते यदा आगमिष्यन्ति तदा तैः सार्द्धमेव गमिष्यामोऽतस्तावत् त्वमस्मत्समीपे तिष्ठेति शङ्कानिरासाय, विचिन्वन्तीत्युक्तम् । तथाच गृहान्निर्गता मध्ये स्फुटितैर्मार्गान्तरैर्गताः सन्तो विचिन्वन्त्येवातोऽत्रागमनं तेषां दुर्घटमतो विचिन्वन्तो ऽतिखेदं मरणं वा प्राप्नुयुरित्यर्थः । नन्वस्तु, किमस्माकं तैरितिचेत् तत्राह ॥मेति ॥ तैः सार्द्धमेवावस्थानयोग्यानां कुलाङ्गनानां युष्माकं तत्साध्वसोत्पादिका प्रवृत्तिर्नोचितेति भावः ॥ मानिनीपक्षे, ननु किमित्येवं निर्लज्जः सन् बहुपरिवाररक्षिता लज्जावतीरस्मान् प्रति ब्रवीषि, वयमत्र क्षणमात्रमप्यवस्थातुं न शक्नुमः । यतः परमप्रेमास्पदा अस्मानऽपश्यन्तोऽस्मन्मात्रादयोऽन्वेषणाय निःसृताः स्युरतस्तेषां मध्ये यद्येकोऽप्यत्रागत्य वाऽस्मान् पश्येत् तर्हि महाननर्थो भवेत् तस्मात् तदागमनात् पूर्वमेव झटित्येवास्माभिर्गन्तव्यमिति चेत् तत्राह ॥ मातर इति ॥ बन्धुभ्यः साध्वसं मा कुरुध्वम् । यतस्ते मात्रादयोऽपश्यन्तः सन्तो विचिन्वन्त्येव, न तु गहनेऽस्मिन् वने तेषामागमनं सम्भाव्यत इति भावः । यद्वा, विचिन्वन्ति, न त्वत्रायान्ति, नाप्यायास्यन्ति । हि यतोऽपश्यन्तो न द्रक्ष्यन्त्येव वनस्यास्यातिनिबिडत्वान्मया तामस्या विद्यया एतत्स्थानस्याच्छादितत्वाच्च ।

अतस्तद्भयं विहाय मया सार्द्धं यथेष्टं रमतेति भावः ॥

निवृत्तिपक्षे, ननु निर्विशेषमखण्डं ब्रह्म यथोक्तरात्रिकल्पमिति त्वया कथं ज्ञातमित्याशङ्क्य बहुविद्वत्सम्प्रतिपत्तेरित्याह ॥ मातर इति ॥ ये मात्रादिस्थानापन्नाः सांख्याध्वरमीमांसकादयो विचिन्वन्ति, यथोक्तं ब्रह्म श्रुतिप्रमाणकमस्ति ? न वेति ? विचारयन्ति तथापि न पश्यन्त्येव । तथा च यदि स्यात् तर्हि परमविचक्षणैरन्वेष्यमाणमवश्यमुपलभ्येत, नोपलभ्यते । स्फीतालोकवर्तिघटानुपलब्ध्या घटाभाववत् तदभावो निश्चीयत इति भावः । तस्माद् यथोक्तरात्रिकल्पत्वत्राणाय परमोद्योगवत्त्वादेते वो बन्धवस्तेषां साध्वसं तन्मताननुमोदनेन वेदबाह्यत्वप्राप्तिभयं मा कुध्वम् । स्वरक्षकस्य रक्षणमेवोचितं, न तु भयप्रदानमिति भावः ॥२०॥

एवमुक्त्वा अहो भगवदनुग्रहालाभान्निष्फलमेवास्माकमागमनं जातमिति विचार्य्य खिन्नचित्ता आश्वासयति ।

दृष्टं वनं कुसुमितं राकेशकररञ्जितम् ॥
यमुनाऽनिललीलैजत्तरुपल्लवशोभितम् ॥ २१ ॥

दृष्टमिति ॥ युष्माभिरत्रागत्य वनं दृष्टमेव । नन्वेवं चेत् तर्हि कलगीतेन किमर्थमत्र वयमाहूता इत्याशङ्कापि परिहृता । वनं दृष्ट्वा मया विचारितमहो इदं वनं स्वभक्ताभ्योऽपि प्रदर्शनीयमित्याशयेन कलगीतेन मयाऽऽहूता इति भावः । ननु का वाऽत्र दर्शनीयतेति चेत् तत्राह ॥ कुसुमितमिति ॥ ननु कुसुमितवनमेव यद्यस्माकं प्रदर्शयितव्यं तवाभीप्सितं स्थितं तदा दिने एव वयं कुतो नाकारिता इतिचेत् तत्राह ॥ राकेशः पूर्णचन्द्रस्तस्य करैः किरणै रञ्जितम् । तथाच दिने रात्र्यन्तरे वा नास्त्येवंविधा शोभेति भावः । किञ्च, वायुरप्येवंविध समयान्तरदुर्लभ इत्याशयेनाह ॥

यमुनास्पर्शिनोऽनिलस्य वायोर्लीला मन्दगतिस्तया राजन्तः कम्पमानास्तरूणां पल्लवास्तैः शोभितम् । तस्मान्नास्यागमनवैयर्थ्यमिति भावः ॥ अनभिज्ञापक्षे, ननु भवतु, तव निकटे न स्थीयते । अन्यप्रदेशे गत्वा स्थास्याम इत्यभिप्रायवतीरालक्ष्याह ॥ दृष्टमिति ॥ एवंविधप्रदेशान्तरं नास्ति । अयं च प्रदेशो दृष्ट एव भवतीभिरतोऽलं वृथा कालक्षेपेणेति भावः । यद्वा, किमेवं मात्रादिबन्धुभयं प्रदर्श्यते, तव त्वऽस्माकं दत्तजलाञ्जलिप्रायमेवान्यथा तान् परित्यज्य रात्रौ बहिरागमनं कथं भवेत् । त्वं बिभेषि चेत् त्वमेवेतो गच्छेति प्रणयकोपवतीरालक्ष्याह ॥ दृष्टम् ॥ अहो मयापि ज्ञायते, निर्दोषाणां नास्ति कुतो भयम् । तथापि बुद्धिमतीनां वृथा गृहान्निःसरणस्यायुक्तत्वाद्वनशोभेक्षणार्थमागताः स्युस्तच्च सम्पन्नमितो वृथाऽत्र न स्थेयमिति भावः । यद्वा, तच्छ्रुत्वा लज्जयेतस्ततो विलोकयन्तीरवलोक्याह ॥ दृष्टमिति ॥ अहो ज्ञातं मया, साध्वीनां भवतीनां गृहान्निर्गमनं वनेक्षणाय, तच्च जातमतो गन्तव्यमिति भावः । ननु प्रसङ्गादत्रागताः फलानि गृहीत्वा यास्याम इतिचेत् तत्राह ॥ कुसुमितम् ॥ न तु फलितम् । एतच्छ्रुत्वोदूर्ध्वदृष्टीरालोक्याह॥राकेशकररञ्जितम् ॥ अतः शरत्पूर्णचन्द्रचन्द्रिकाशोभेक्षणाय भवत्यः समागताः स्युस्तदपि जातमिति भावः । यमुनाभिमुखीरालोक्याह ॥ यमुनेति॥ मानिनीपक्षे, ननु तथापि गृहाद् बहिरस्माकं मनो न रमतेऽतः कथमत्र तिष्ठाम इतिचेत् तत्राह ॥ दृष्टमिति ॥ कुसुमितमिदं वनं भवतीभिर्दृष्टम् । तथाच नास्ति गृहेष्वेवंविधकुसुमशोभाऽतोऽत्र कस्य मनो न रमते। प्रत्यक्षोपलब्धस्यापलापो न युक्त इति भावः । किञ्चैवंविधं राकेशकररञ्जनं यमुनानिललीलैजत्तरुपल्लवशोभा च गृहेषु क्वास्ति । तस्मादेतत् सर्वमवलोक्यैव प्रेयस्यो भवत्यो मया

स्मृताः । स्मृत्वा कलगीतेनाहूता भवत्योऽप्यागत्य तथैव दृष्टवत्यो-ऽतो गमनाग्रहं विहायेह स्थेयम् । गोष्ठं प्रति मा यातेति परेणा-ऽन्वयः ॥

निवृत्तिपक्षे, ननु भवन्तो विवेकचन्द्रानुदयाद्वैराग्यादिरहिता अस्मदभिप्रायं न जानन्ति । विवेकादिसाधनसम्पन्नान्तःकरणास्तु जानन्तीत्याशङ्क्याह ॥ दृष्टमिति ॥ राकेशस्य विवेकचन्द्रस्य करै-र्विचारभेदै रञ्जितं शान्त्यादिलक्षणकुसुमशोभितमन्तःकरणलक्षणं वनं दृष्टमित्युपहासः । नाममात्रे श्रुत्यर्थाभासा ये विवेकादिमन्त इति भावः । यतो यमुनास्थानीयाऽविद्यासम्बन्धिनोऽनिलस्य तत्स्थानीयस्य विक्षेपस्य लीलया तत्तद्विषयलालसया एजन्तस्तरु-स्थानीयस्य वैराग्यस्य पल्लवास्तत्स्थानीया अविचारोत्था वैरा-ग्यभेदास्तैः शोभितम् । यद्वा, यथोक्तयमुनानिललीलया विलासेन एजन्तश्चलन्तः प्रवेपिताः संसारवृक्षस्य पल्लवा विषयप्रवालास्तैः शोभितम् । तथाच श्रुतवेदान्तानामपि यथापूर्वसंसारोपलम्भे तेषां विवेकाद्याभासमवलोक्य तन्मतानुसरणं नोचितमिति भावः॥२१॥

अहो नाद्यापि भगवतस्तोषोऽस्मासु जातो वर्ततेऽतस्तदर्थं क-मुपायमनुतिष्ठाम इति चिन्तयन्तीर्व्याकुलचित्ता अवलोक्य, वर्णा-श्रमाचारवता पुरुषेण परः पुमान् * विष्णुराराध्यते पन्था ना-न्यस्तत्तोषकारणमित्युक्तत्वात् स्वधर्माचरणमेव मम तोषोपायोऽत-स्तत्रैवाभ्यास उचित इत्याशयेनाह ॥

तद् यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः ॥
क्रन्दन्ति वत्सा बालाश्च तान् पाययत दुह्यत ॥२२॥

तद् यातेति॥ यस्मादत्रावस्थानं निष्फलं, तत्र गमनं च स्व-धर्माचरणेन मम तोषकरत्वात् सफलं तत् तस्माद् गोष्ठं यात ।

तत्रापि, मा चिरं शुभकार्ये विलम्बो नोचित इति भावः । तत्र गत्वा पतीन् सेवध्वम् । यतो, हे सत्यः! पतिव्रतानां युष्माकमिदमेवानुष्ठेयमिति भावः । यद्वा, सतीः पतिव्रताः श्वश्र्वाद्याः स्त्रीः सेवध्वम् । संसर्गजा गुणदोषा भवन्तीति न्यायाद् गुणवतीनां सेवनेन भवत्योऽपि तथाविधा भविष्यन्तीति भावः । ननु स्वधर्माचरणस्य भवच्चरणाभिमुख्यमेव फलं, तस्य जातत्वात् ततो निवृत्तिरेवाधुना श्रेयसी । आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते * योगारूढस्य तस्यैव शमः कारणमुच्यते* इत्यादिशास्त्रादतस्त्वदाभिमुख्यमसहमानास्ते कथं सेवनीयाः । ततस्तादृशं पातिव्रत्यं त्वदङ्घ्रिपाथोरुहयोर्नीराजनीकृत्य दूरतस्त्यक्तमस्माभिरित्याशङ्क्य, दयया सर्वभूतेष्विति*दयाया मदाराधनाङ्गत्वात् सा त्ववश्यमपेक्षितेत्याशयेनाऽऽह ॥ क्रन्दन्तीति ॥ अतस्तान् गत्वा दुग्धं पाययत, तदर्थं गाश्च दुह्यत ॥ अनभिज्ञापक्षे, एवंव्याजेनोद्दीपयित्वा निषेधेनात्यासक्तिमुत्पादयति ॥ तदिति ॥ हि यद् यस्मादत्रावस्थाने फलं किञ्चिदपि नास्ति तत् तस्माद् गोष्ठं यात । तत्रापि मा चिरं, यतः पतिशुश्रूषासमयो वर्तते इत्याशयेनाह ॥ शुश्रूषध्वं पतीन् ॥ यतो हे सत्यः, अतः क्षणमात्रमपि परपुरुषस्य मम पार्श्वेऽवस्थानं पतिव्रतानां युष्माकं नोचितमिति भावः । यद्वा, कथं भूतान् पतीन्, सतीः।एते युष्मत्पतयः पूर्वजन्मनि पतिव्रताः स्त्रियः स्थिताः पुरुषभावनया पुरुषत्वं प्राप्ता, भवत्यस्तु पूर्वं पुरुषाः स्थिताः स्त्रीषु आसक्तचित्तत्वात् स्त्रीत्वं प्राप्ता, अतः पुनर्वैपरीत्यार्थं पतीन् शुश्रूषध्वमित्याशयः । किञ्च, करुणाऽपि स्त्रीणां स्वाभाविकी भवति । अतः करुणावतीनां युष्माकं बाला वत्साश्च क्रन्दन्ति,अतो गत्वा तान् पाययत, दुह्यत ॥ मानिनीपक्षे यद् यस्माद् बन्धुभयं नास्ति, वनशोभादिरूपा रमणसामग्री चैतादृशी ततः शीघ्रं मा यात, कि-

न्तु रासानन्तरं रान्त्र्यन्ते यास्यथेत्यर्थः । ननु पतिशुश्रूषणादिबहु-व्यापारस्योर्वरितत्वान्नास्त्यस्माकं चिरतरकालमवस्थानाऽवकाश इति चेत् तत्राह ॥ पतीन् मा शुश्रूषध्वम् । सतीः श्वश्रूप्रमुखा मा शुश्रूषध्वम् । सतीपदवीं वा मा सेवध्वम् । नन्वस्माकं बाला वत्साश्च क्रन्दन्त्यतः कथमत्र स्थैर्यमित्याशङ्क्य क्षणं नेत्रे निमील्य सकैतवं ध्यात्वाऽऽह ॥ वत्सा बालाश्च मा क्रन्दन्ति ॥ अहमत्र स्थित एव सिंहकलया जानामि—ते सुखेन वर्तन्ते, न त्वाक्रोशन्ति तस्मान्मा पाययत । दासादिभिः पायितत्वात् तु, मा दुह्यत । तैरेव दोहनस्यापि कृतत्वादित्यर्थः ॥

निवृत्तिपक्षे, यस्मान्निर्विशेषब्रह्मप्रतिपादनं न, तत् तस्मादाशु गोष्ठं क्रियार्थकश्रुतिसमुदायं यात, स्वसमुदायनिविष्टा भवत, क्रियामेव प्रतिपादयत । तदुक्तम्—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति । ब्रह्मणः परिनिष्ठितरूपत्वात् परिनिष्ठिते वस्तुनि च प्रत्यक्षादीनामपि प्रवृत्तिसम्भवात् तैरसंवादे प्रामाण्यस्य दुर्लभत्वात् सार्थक्याय क्रियामेव प्रतिपादयतेत्याशयः । ननु पौरुषेयवाक्यानि प्रामाणान्तरापेक्षत्वात् संवादविसंवादाभ्यां प्रामाण्यमप्रामाण्यं वा लभन्ते । अपौरुषेयाणां वेदवाक्यानां तु प्रमाणान्तरानधिगम्यविषयतया चक्षुरादिवदनपेक्षमेव प्रामाण्यमिति चेत् । सत्यम् । तथापि अनपेक्षप्रामाण्ययोरपि चक्षुःस्पर्शनयोरर्थे विसंवादाद् यथाऽन्यतरस्याप्रामाण्यं तथा ब्रह्मैकत्वश्रुतीनामहं मनुष्य इत्यादिप्रत्यक्षस्य च परस्परव्याघाताच्छब्दस्याप्रामाण्यम् । तस्मात् तत्रैव स्थित्वा पतीनिन्द्रचन्द्रादिरूपान्, तत्कर्मप्रतिपादनेन शुश्रूषध्वम् । यतो, हे सत्यः ! स्वाध्यायविध्युपात्तत्वादप्रामाण्यशङ्काकलङ्काऽयोग्याः । किञ्च, सर्वमिथ्यात्वसिद्धान्तमाकर्ण्य वत्सबालस्थानीयकर्माधिकारिणः सर्वेऽपि क्रन्दन्ति, अत-

स्तान् पाययत दुह्यत । तत्कर्मफलं सत्यमिति प्रतिपादनेन तत्स-न्तोषं सम्पादयतेत्यर्थः ॥ २२ ॥

एतच्छ्रुत्वाऽत्यन्तखिन्नचित्ता आलक्ष्य, अथवा नास्ति भवतीनां वनशोभेक्षणेच्छा, नापि मदपेक्षयाधिकं पुत्रादौ स्नेहोऽतो मदर्थमत्र समागता इत्याह ॥

अथवा मदभिस्नेहाद् भवत्यो यन्त्रिताशयाः ॥
आगता ह्युपपन्नं तत् प्रीयन्ते मयि जन्तवः ॥ २३ ॥

अथवेति ॥ मयि यः स्नेहस्तेन यन्त्रिताशया वशीकृतचित्ताः सत्यो, मद्दर्शनार्थं यूयमागता इति स्यात् । तदेतदुपपन्नमुपपत्ति-युक्तम् । न त्वयुक्तः पक्षः । हि यतः सर्वेऽपि जन्तवो मयि प्रीता भवन्ति । यद्वा उपपन्नं सिद्धम् । यतो मयि दृष्टे जन्तवः प्रीयन्ते अतो भवत्यो मद्दर्शनेन प्रसन्नाः सत्यो गच्छतेति भावः ॥ अनभिज्ञापक्षे, एवं श्रुत्वा संरम्भक्षुभितदृष्टीरालक्ष्य ततोऽप्यधि-कक्षोभमुत्पादयति ॥ अथवा, वनादिकं द्रष्टुं नागताः, ते पक्षा वृथैव मया कल्पिताः । भवत्यस्तु मयि यो योजितः स्नेहः स्वाभा-विकी प्रीतिर्न तु कामाद्युपाधिका, तेन यन्त्रिताशया आगतास्त-दुपपन्नम् । अयमेव पक्ष उपपन्नः । हि यतः सर्वे प्राणिनो मयि प्रीयन्ते । तथाच सामान्यप्रीत्यतिशयवत्यो मद्दर्शनार्थमागताः । तस्यापि जातत्वाद् गन्तव्यमिति भावः । अथवा, यतो मयि ज-न्तवः प्रीयन्ते अतो मत्स्नेहाद् भवत्योऽपि यन्त्रिताशयास्तदेतदु-पपन्नम् । यत आगताः ॥ मानिनीपक्षे, पूर्वं यद्यपि प्रयोजनान्तरार्थ-मागता भवत्यस्तथापि मन्मनोरथपूर्त्यर्थमत्र तिष्ठतेत्युक्तमिदानीं भवतीनां मयि स्नेहातिशयो वर्तते इति चिरकालान्मया बुद्ध्यते।ततः किमर्थं तत्तिरोधानं क्रियत इत्याशयेनाह ॥ अथवा मदभिस्नेहाद्

भवन्तो यन्त्रिताशया यत आगताः । भवन्तस्तु योग्या एव । मयि तु सर्वेऽपि जन्तवः प्रीयन्तेऽतो मत्स्नेहाकृष्टचेतसामत्रागमनमुपपन्नम् । बहुयोग्यं जातम् । अतोऽत्र स्थित्वा तत्फलं सम्पाद्यमिति भावः ।

निवृत्तिपक्षे पूर्वं श्रुतीनां समस्तानां क्रियापरत्वमुक्तम्।तत्र ब्रह्मप्रतिपादकश्रुतीनां क्रियापरत्वासंभवादानर्थक्यं, हुंफडादिवज्जपमात्रोपयोगित्वं वाऽस्त्विति सूचितम्। इदानीमध्ययनविध्युपात्तानां वेदान्तानामानर्थक्यायोगं, प्रतीयमानार्थस्य प्रत्याख्यानासम्भवं चाभिप्रेत्याऽस्तु वा कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वमुपनिषदामिति पक्षान्तरमाह ॥ अथवा मयि अस्मत्प्रत्ययगोचर आत्मनि अभिस्नेहात् प्रतिपादनपरत्वाद्, यन्त्रिताशया आनर्थक्यं जपोपयोगित्वं वा गमयितुमशक्यास्तर्हि, उपपन्नं कर्मणा सम्बद्धं कर्तृदेवतादिरूपमात्मानमागतास्तत्स्वरूपप्रकाशने सङ्गताः । एवं रीत्या प्रतिपाद्यमाने मयि आत्मनि सति जन्तवः सर्वेऽपि लोकाः प्रसन्ना भवन्तीत्यर्थः ॥ २३ ॥

यद्यपि भवन्तो मयि स्नेहातिशयवन्तो मद्दर्शनार्थमत्रागता इत्यहं जानामि, तथापि श्रुतिस्मृतिबोधितस्वधर्मत्यागोऽयमनिष्ट इत्याशयेनाह ।

भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया ॥
तद्बन्धूनां च कल्याण्यः प्रजानां चानुपोषणम् ॥२४॥

भर्तुरिति ॥ भर्तुः शुश्रूषणं स्त्रीणां पर उत्कृष्टो धर्मः । स्त्रीणामिति विशेषणेन, एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः * भक्तियोगो भगवति तन्नामग्रहणादिभिरित्यादिशास्त्रात्

पुरुषाणां साक्षान्मद्भजनमभिहितम् । स्त्रीणां तु स्वपतिरूपस्य ममाराधनमुक्तम् । नैव यज्ञक्रिया काचिन्न श्राद्धं नोपवासकम् ॥ या तु भर्तरि शुश्रूषा तया स्वर्गं जयत्युतेत्यादिशास्त्रात् । तत्राप्य-ऽमायया कपटराहित्येन । तस्य बन्धूनां स्वश्वश्र्वादीनां च शुश्रूषा, प्रजानां पुत्रादीनां चानुपोषणं स्तनादिदानेन पित्रादिभिः पोष्य-माणानां तदनु स्वेन पोषणमिति वा। हिशब्दो यथोक्तधर्मस्य लोक-वेदप्रसिद्धिं द्योतयति । श्रुतिस्मृती ममैवाज्ञे तदुल्लङ्घ्य प्रवर्तते ॥ आज्ञाभङ्गी मम द्वेषी मद्भक्तोऽपि न वैष्णव ॥ इत्यादिशास्त्रात् स्व-धर्माविरोधेन मे सेवामार्गः कल्याणकर इति सम्बोधनाशयः ॥ अनभिज्ञापक्षे, ननु मत्स्नेहाकृष्टमानसा मदर्थमागता इति यदि जा-नासि तर्हि प्रतियात व्रजं, तद् यातेति किमिति निष्ठुरं ब्रवीषि । न हि परमस्निग्धानामियं रीतिरित्याशङ्क्य, पापान्निवारयति यो-जयते हिताय ॥ इति मित्रलक्षणस्याभिहितत्वाल्लोकद्वयहितार्थ-मिदं मदीयं वाक्यमतिकोमलमित्याशयेनाह ॥ भर्तुरिति ॥ एतेन त्वयि स्निग्धत्वात् त्वच्छुश्रूषणमधुना कर्तुं प्रवृत्ता अतो भवता-ऽपि तदनुमोदनं कर्तव्यमिति शङ्कापि निरस्ता । यथायोग्यस्नेहस्य शुश्रूषणस्य च युक्तत्वात् । तथाच भर्तरि कर्तव्यं स्नेहादिकमन्यत्र न कार्यमतो मय्यपि यथा जन्तवः प्रीयन्ते तथा प्रीतिः कर्तव्येति भावः । भवतीनां सर्वेऽपि सन्तीति सम्बोधनाशयः ॥ मानिनीपक्षे, नचात्राऽधर्मः शक्यो, ममैव युष्मद्भर्तृत्वे मत्सेवनस्य परमधर्मत्वा-दित्याशयेनाह ॥ अमायया भर्तुर्बालभावादारभ्य निष्कपटतया भर्तृत्वेन वृतस्य मम शुश्रूषणं परो धर्मो, न तु बन्धुभिर्बलात्कारे-णापादितस्य । भीष्मेणाऽम्बायाः परित्यागेन बलापादितस्य धर्मतो भर्तृत्वासिद्धिज्ञापनायैतत् । तस्मात् कपटागतभर्तृतद्बन्ध्वादिसेवादिकं विहाय, मम मद्बन्ध्वादिसेवनादिकमेव भवतीनां धर्मतोऽपि प्राप्त-

त्वादावश्यकमित्यर्थः । एवं कृते नास्ति कदाप्यकल्याणमिति संबोधनाशयः ॥

निवृत्तिपक्षे, तस्माद् भर्तृस्थानीयस्य प्रतिपाद्यार्थस्य सेवनं तत्परत्वमेव स्त्रीस्थानापन्नानां श्रुतीनां धर्मः शक्त्यादिलक्षणः । ननु तात्पर्येणान्यपरत्वेऽपि स्वार्थपरता न हीयते इति चेत् तत्राह ॥ अमाययेति ॥ यत्परः शब्दः स शब्दार्थ इति न्यायात् । तथाच निर्व्याजेन स्वार्थपरत्वं परमो धर्मः । उभयपरत्वे वाक्यभेदादेकपरत्वमावश्यकम् । सम्भवति स्वार्थपरत्वेऽन्यपरता न न्याय्येति भावः । क्वचिच्छक्यार्थासम्भवे, तद्बन्धूनां शक्यार्थसम्बन्धिनां सेवा प्रतिपादनमपि धर्मः । प्रजानां तत्स्थानीयानां मतानां विद्वद्भाविततर्कैः, पुष्टानामनुपोषणं, तत्रैव प्रमाणतयोपस्थितत्तया पुनरतिपुष्टत्वसम्पादनं च । यतो हे कल्याण्यः सर्वकल्याणकृत्प्रवृत्तिनिवृत्तिबोधनपरशास्त्ररूपाः । अन्यथा शास्त्रपदप्रतिपाद्यत्वमेव भवतीनां न स्यात् । प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा * पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते * इति शास्त्रलक्षणाभिधात् ॥ २४ ॥

यतः पतिरेव स्त्रियः परमं दैवतं, तदाराधनं च परमो धर्मः, तेनैव च लोकद्वयविजय इति लोके शास्त्रे च घण्टाघोषस्तस्माद् दुःशीलत्वाद्यनेकदोषयुक्तोऽपि न त्याज्यः। किमुत दोषविनिर्मुक्त इत्याशयेनाह ।

दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा ।
पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥२५॥

दुःशील इति ॥ दुष्टं शीलं द्यूतादिव्यसनं यस्य सः। दुर्भगो मन्दभाग्यः । वृद्धो जराजर्जरीभूताऽङ्गः । जडो मूर्खः । रोगी प-

हारोगग्रस्तः । अधनः स्वोदरपूरणेऽप्यसमर्थः । एवमुक्तदोषेष्वेकैकदोषवान्, किं वा सकलदोषयुक्तोऽपि पतिर्लोकद्वयविजयेच्छावतीभिः स्त्रीभिर्न हातव्यो नैव त्याज्यः। पातकी तु यावत् पातकं तावद्धातव्यः । पतिं त्वपतितं भजेत् * आशुद्धेः सम्प्रतीक्ष्यो वै महापातकदूषित * इत्यादिवचनात् । अनभिज्ञापक्षे, ननु अस्माकं पतयो नास्मदनुकूला अनुरूपाश्चातस्त्यक्ता एवातः किं तत्सेवाद्युपदेशेनेति चेत् तत्राह ॥ दुःशील इति ॥ षड्विधैश्वर्य्ययुक्तमपि परपुरुषमवलोक्य षड्विधदोषयुक्तोऽपि स्वपतिर्न हातव्यः । व्रजवासी तु सर्वसद्गुणयुतो निष्पापश्चातः कथं त्याज्यो भवेदित्याशयः । मानिनीपक्षे— तस्माद् बलात्कारेणाहृतयाऽप्यऽम्बया स्वमनसा वृतः पतिर्न त्यक्तो, यथा च सावित्र्या पितुर्वाक्यात् सत्यवान्न त्यक्तस्तथान्याभिर्युष्मदादिभिः स्त्रीभिर्मनसा वृतः पतिर्न हातव्यः । तत्रापि षड्विधैश्वर्यसम्पन्नोऽहं, न तु दुःशीलत्वादियुक्तः। वस्तुतः सर्वदोषयुक्तोऽपि न त्याज्यः। पतिरित्येकवचनात्, स्त्रीभिरिति बहुवचनात् स्वस्यैव सर्वासां पतित्वं दृढीकृतम् । तथाच तेषां वस्तुतः पतित्वाभावान्न तत्त्यागे कश्चिद्दोष इति भावः ॥

निवृत्ति पक्षे तत्र दृष्टान्तमाह ॥ दुःशील इति ॥ वाशब्द इवार्थे। तथाच यथा पतिसम्पृक्तत्वं पतिव्रतायाः स्त्रियास्तथा वाचोऽपि स्वार्थसम्पृक्तत्वमिति भावः ॥ २५ ॥

ननु परमेश्वर आसक्तचेतसामस्माकं नास्ति जारपरमनसामिव पतित्यागादिकृतो दोष इत्याशङ्क्य मोक्षार्थं तथा चेदस्तु तथा, रमणेच्छया तु मय्यप्यासक्तानां स्वपतित्यागे दोष एवेत्याशयेनाह ।

अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् ॥

जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रियः ॥ २६ ॥

अस्वर्ग्यमिति ॥ कुलस्त्रियः सर्वत्र सर्वस्मिन्नपि पुरुषे औपपत्यम् अस्वर्ग्यं परलोकनाशकम् । अयशस्यमेतल्लोकनाशकम् । तत्रापि फल्गु अतिक्षुद्रम् । तथाभूतमपि कृच्छ्रं महाप्रयाससाध्यम् । किञ्च, सम्भोगकालेऽपि भयजनकम् । पुनः साधुकर्मणि प्रवृत्तावपि जुगुप्सितं निन्दितम् । चकाराभ्यां नरकपातजातिबहिष्कारादिसंग्रहः । तस्मान्मदाराधने यदि युष्माकमाग्रहस्तर्हि भगवद्बुद्ध्या तदनुष्ठेयं, न तूपपतिबुद्ध्येति भावः । अनभिज्ञापक्षे, विपक्षे दोषमाह ॥ अस्वर्ग्यम् ॥ ननु नास्माकं स्वर्गापेक्षेति चेत् तत्राह ॥ अयशस्यम् ॥ ननु तदपि नापेक्षितं, यद्वा रहसि नास्ति तन्नाश इति चेत् तत्राह ॥ फल्गु ॥ क्षणिकत्वात् । ननु मिथ्या ब्रवीषि, त्वया सह तस्यानन्तसुखजनकत्वनिश्चयादिति चेत् तत्राह ॥ कृच्छ्रम् ॥ पत्यादिवारणाद् दुःसाध्यम् । ननु निर्जनवने निवारकस्यादर्शनान्नास्ति दुःसाध्यम्, अस्तु वा, तथापि, वामता दुर्लभत्वं च स्त्रीणां या च निवारणात् * तदेव पञ्चबाणस्य मन्ये परममायुधमित्यादिवचनाद् दुःसाध्यता प्रत्युतासक्त्यतिशयहेतुरितिचेत् तत्राह ॥ भयावहम् ॥ लोकशास्त्रनिषिद्धत्वाद् यमराजादिदण्डजनितभयप्रापकम् । ननु त्वदधरसुधालोभात् सर्वमपि भयमस्माभिस्त्यक्तम् । यद्वा, यत्र निषेधविशेषो दुर्लभत्वं च यन्मृगाक्षीणाम् * तत्रैव नागरीणां निर्भरमासज्जते हृदयमिति रसशास्त्रोक्तेर्भयमपि प्रत्युत रसाधायकमेवेति चेत् तत्राह ॥ सर्वत्र स्वपरदेशयोर्व्यवहारपरमार्थयोश्च निन्दितं तत्रौपपत्यं सौख्यम् । ननु स्वाभीष्टसिद्धौ निन्दाऽस्माभिः सह्यत इति चेत् तत्राह ॥ कुलस्त्रियः ॥ कुलस्त्रीभिरेवं न वक्तव्यमिति भावः । अनेन यद्यप्यासक्तचित्तत्वाद्भव-

तीभिः किमपि न गण्यते, तथाऽप्युत्तमवंशोद्भवेन मया कुलस्त्रियो नैव कलङ्कनीया इत्यपि ध्वनितम् । हे कुलस्त्रिय इति सम्बोधनं वा ॥ मानिनीपक्षे, पूर्वोक्तरीत्याहमेव मुख्यः पतिस्त एवोपपतय इति तत्सङ्गमसुखमेवाऽस्वर्ग्यादिरूपम् । यद्वोत्प्रेक्षितानि स्मृतिवाक्यानि । अस्माभिस्तु भर्तृसेवादिः परो महानधर्म इत्युच्यते । स्वस्मिन्नासक्तचित्तस्य प्रेष्ठस्य दुःखजनकत्वात् । तथा अपातक्यपि दुःशीलत्वादिदोषविशिष्टः किं न हातव्योऽपि तु हातव्य एव । स्वस्य दुःखजनकत्वात् । तथाचैवंविधपत्युः सामीप्यमस्वर्ग्यादिदोषयुक्तमेवेति नर्मव्यञ्जनपरत्वेन श्लोकत्रयं व्याख्येयम् ।

यद्वा मदासक्तचित्तत्वाद्भर्तृसेवादौ नास्ति भवतीनामधिकार इत्याह ॥ भर्तुरिति ॥ अमायया निष्कपटतया, न तु भवतीनामन्यासक्तमानसत्वेन मायावतीनाम् ॥ तथा पतित्यागनिषेधेऽपि नास्ति भवतीनामधिकारो, मय्यनुरक्ततया लोकद्वयाभिलाषराहितत्वादित्याह ॥ दुःशील इति ॥ किञ्चापातकी चेन्न हातव्यो, युष्मद्भर्तारस्तु पातकिन एव । जन्तुमात्रप्रीतिपात्रे जन्मप्रभृतिरक्षापरायणे मयीर्ष्यावत्त्वेन साधुद्वेषपरत्वात् कृतघ्नत्वाच्च । कृतघ्नाश्चातिपातकित्वेनोक्ताः । तदुक्तं, ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा * निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिरिति । ननु तत्सेवादावनधिकारेऽप्यौपपत्यस्य निषिद्धत्वात् तदङ्गीकारे स्वर्गादिबाधस्त्ववश्यम्भावीति चेत् तत्राह ॥ अस्वर्ग्यमिति ॥ कुलस्य ब्राह्मणाद्युत्कृष्टकुलस्य स्त्रियस्तदस्वर्ग्यादिदोषावहं, न तु गोपाङ्गनानां युष्माकम् । तथाच तन्निषेधवाक्यानि तत्पराणीति भावः ॥

निवृत्तिपक्षे यथा कुलस्त्रिय औपपत्यं दोषावहं तथा श्रुतमर्थं परित्यज्याश्रुतार्थपरत्वं श्रुतहान्यश्रुतकल्पनादिदोषावहमित्यर्थः ॥२६

नन्वेतत् सर्वं लोकदृष्ट्या भगवतोक्तम् । वयं तु पुरुषोत्तमे त्वय्यासक्ता अतो नास्माकं स्वधर्मत्यागप्रयुक्तो दोषो, भगवदाराधनस्य सर्वोत्तमधर्मत्वादित्याशङ्क्यैवं तर्हि न लौकिकस्नेहस्योपायो विधेयः । कामशेषस्य लौकिकस्य हीनत्वादिशयेनाह ॥

श्रवणाद् दर्शनाद् ध्यानान्मयि भावोऽनुकीर्तनात् ॥
न तथा सान्निकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥

श्रवणादिति॥आदौ श्रवणं भगवत्प्रतिपादकवाक्यादीनां भगवति शक्तितात्पर्यावधारणम्।पश्चात् तेषामनुकीर्तनम् । अवधारितार्थस्य स्थिरीकरणायाभ्यासो मननमिति यावत् । ततो ध्यानं श्रुते मतेऽर्थे चित्तस्य स्थिरीकरणं निदिध्यासनम् । ततो दर्शनं तदर्थस्यानुभवः । भगवत्कृपया साक्षात्कारस्तस्माद् यो मयि भावः परप्रीतिलक्षणो यथा भवति न तथा सान्निकर्षेण भावो भवति । लौकिकसङ्गेन लौकिक एव कामशेषभूतो भावो भवतीत्यर्थः । ततस्तस्माच्छ्रवणाद्यर्थं गृहान् प्रति यात । यद्वा, न वयं सम्भोगार्थिन्योऽपि तु प्रेमलक्षणभक्तिमात्रेच्छावशोऽतः सर्वं विहायात्रागता, अतस्तदर्थं भवत्सान्निकृष्टतया स्थास्याम इतिचेत् तत्राह ॥श्रवणादिति ॥ स च मयि भावः श्रवणादिना यथा भवति, न तथा सान्निकर्षेण । ततस्तदर्थं गृहान् प्रति यात।यद्वा अहो भगवत्सान्निधाववस्थानेऽपि वयमयोग्या इति खिन्नचित्ता आलक्ष्याह ॥ श्रवणादिति ॥ मन्मुख्यभक्ताः सामीप्यसालोक्यादिकमपि न कामयन्ते, किन्तु श्रवणकीर्तनादिभिरेव रमन्ते तेऽतो युष्माभिरपि श्रवणादिभिर्निरुपाधिको मयि भावः सम्पाद्यः, किं सन्निकर्षप्रार्थनयेति भावः। अनभिज्ञापक्षे, अहो दैव, यस्मिन् वयमनुरक्तचित्ताः

प्रेमाभिकामाः कदापि वियोक्तुमयोग्यास्ताभ्यः स्वाङ्गसङ्गं न प्रयच्छति स्वसन्निधावत्रस्थानमपि निषेधत्यतः किं कुर्मः क्व गच्छाम इति व्याकुलमानसा लिखितचित्रवदवस्थिता दृष्ट्वा तासां पूर्णभावमालक्ष्य तस्य परमदार्ढ्यसिद्ध्यर्थमाह ॥ श्रवणादिति ॥ परिपाकपर्यन्तं सम्पादनीयो भावो यथा श्रवणादिना भवति न तथा सन्निकर्षेण । सन्निकर्षस्योत्कण्ठाशैथिल्यकरत्वादपक्वे भावे त्वङ्गसङ्गो न रसावहस्तस्मात् तत्परिपाकहेतूत्कण्ठावृद्ध्यर्थं गृहान् प्रतियातेत्यर्थः । यद्वा, अथवा मदभिस्नेहादित्यनेन मयि साधारणप्रीतिमत्यो भवत्य इत्युक्त्वा कामोपाधिकप्रीतौ भर्तुरित्यादिकमुद्भावितवान् अथेदानीं तस्याभिवृद्धावुपायमाह ॥ श्रवणादिति ॥ यद्यपि वर्तमानकाले कुलस्त्रीणां युष्माकं निषिद्धो भावो नास्तीत्यहं सम्यग् जानामि तथापि शुद्धभावे दोषप्रवेशभयात् तत्र दोषोद्भावनं मया कृतम् । शुद्धभावश्च श्रवणादिना यथा पूर्णतां गच्छति, न तथा सन्निकर्षेण प्रत्युत सन्निकर्षेण सन्निकटस्थित्या मालिन्यं भजते । तन्निन्दाद्युत्थानेन निवर्तते च । तस्मात् तदर्थं गृहगमनमेव युष्माकमुचितं, न त्वत्रावस्थानमिति भावः । यद्वा, कृष्णाङ्गसङ्गोत्कटोत्कण्ठायुतानां कोटिब्रह्मकल्पपर्य्यन्तकुम्भीपाकादिनरकपातादप्यभीतानां सत्कुलोद्भवानामस्माकमाशयमविज्ञाय किमनेन प्रलाप आरब्ध इति कोपेन व्याकुलस्वान्ता आलक्ष्य तत्कोपमन्यथा प्रकल्प्याह॥ श्रवणादिति ॥ अहो भर्तृशुश्रूषादिधर्मनिधिभूतासु यथोक्तदोषगन्धेनापि विमुक्तास्वस्मासु दोषमारोप्यायं प्रलपतीति कोपो न कार्यः । उक्तवाक्यस्य प्रासङ्गिकत्वात् । युष्मदाभिप्रेतस्तु भावः शुद्ध एवेत्यहं सम्यग् जानामि । स च मयि यथा श्रवणादिना वृद्धिं लभते, न तथा सन्निकर्षेणः । ततो गृहान् प्रतियातेत्यर्थः । मानिनीपक्षे, ननु किमेवं कल्प्यते,सद्भावगृहीतोऽहमेव भव-

तीनां भर्ता, न तु पित्रादिदत्ता गोपा इति । सद्भावस्यापि सम्प्रति सन्निकृष्टेषु तेष्वेव सत्त्वादुत्पन्नस्याप्यऽसन्निकृष्टे त्वयि सम्प्रति निवृत्तत्वादितिचेत् तत्राह ॥ श्रवणादिति ॥ यथा श्रवणादिना मयि भावो युष्मदन्तःकरणेषु वर्तते तथा सन्निकर्षेण पतिम्मन्येषु तेषु नास्तीत्यहं सम्यग् जानामीत्यतः किमिति स्वभावतिरोधाने भवत्यः प्रवृत्तास्तस्माद् गृहान् प्रति न यातेति नञोऽनुषङ्गः । यद्वा, ततो गृहानित्यत्राऽकारप्रश्लेषे, अभावे न ह्यऽ नो ना च * इत्यमराद्, अ यात, न प्रतियातेत्यर्थः । यद्वा, ननु मदभिस्नेहाद्भवन्त्यो यन्त्रिताशया इति भवता कथं ज्ञातमितिचेत् तत्राह ॥ श्रवणादिति ॥ अहर्न्निशं मच्छ्रवणादिना तथा सन्निकर्षेण मन्निकटागमनेन भवतीनां मयि भावो वर्तत इति मया ज्ञायते, ततः कपटेन पतिसेवाद्यर्थं गृहान् प्रति न यातेत्यर्थः । यद्वा, ननु पत्यादिसन्निधावेव सर्वदा स्थास्यामस्तत्सन्निकर्षेण च तत्र भावोऽपि भविष्यति, तत्पूर्वकतत्सेवनादिना धर्म्मादिकमपि सेत्स्यतीति तत्राह ॥ श्रवणादिति ॥ तत्सन्निधाववस्थितानामपि युष्माकं यथा मयि भावो भविष्यति मच्छ्रवणादिपरत्वाद्, न तथा पत्यादिषु तदभावात् । ततो गृहानित्यादि पूर्ववत् । एतेन किमित्येव स्वपत्यादिषु भाववतीनामस्माकं धर्माधिकाराभावं वदसीत्युपालम्भोऽपि निरस्तः ॥

निवृत्तिपक्षे, एवं वेदवचसां भूतेऽर्थे प्रामाण्यं नास्त्यतो वेदान्तवाक्यानामपि क्रत्वर्थकर्त्रादिप्रतिपादनपरत्वमभिहितमधुना तूपनिषदां ब्रह्मणि प्रामाण्यं, तथापि स्वप्रकरणगतमनोव्यापारविधिशेषतयैव । तथाच यथा यूपाहवनीयादीनि अलौकिकान्यपि शास्त्रेण समर्प्यन्ते तद्वद्विधिशेषतयैवोपनिषद्भिर्ब्रह्म समर्प्यत इत्याशयेनाह ॥ श्रवणादिति ॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, आत्मा अपहतपाप्मा, सोऽन्वेष्टव्यः स विजिज्ञासित-

व्यः, आत्मेत्येवोपासीत, आत्मानमेव लोकमुपासीत, ब्रह्म वेद ब्रह्मैव भवतीत्यादिना विहिताच्छ्रवणाद्दर्शनान्निदिध्यासनान्मननाद् यथा मयि आत्मनि भावः कार्यान्वितस्वार्थपरत्वविधया तत्परता प्रामाण्यं भवति, न तथा सन्निकर्षेण = तत्त्वमस्याद्यभेदमात्रबोधनेन सिद्धार्थकथनमात्रेण प्रामाण्यं भवति । तथाच यथोक्तविधानेषु सत्सु, कोऽसावात्मा किं ब्रह्मेत्याकाङ्क्षायां, नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दमित्येवमादितत्स्वरूपसमर्पणेन सर्वा उपनिषद उपयुक्ताः । तदुपासनाच्च शास्त्रदृष्टो मोक्षः फलं भविष्यति । कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने हानोपादानासम्भवात्,—सप्तद्वीपा वसुमती, राजाऽसौ गच्छतीत्यादिवाक्यवदुपनिषद्वाक्यनामानर्थक्यमेव स्यादिति भावः । तस्माद् गृहान् कार्य्यसंसृष्टरूपान् यात गच्छत । तद् युष्माकं न्याय्यमित्यर्थः ॥ २७ ॥

एवं भगवद्वाक्यान्युदाहृत्य ततः किं वृत्तमित्यपेक्षायां गोपिकावाक्यान्युदाहर्तुं श्रीशुक उवाच ॥

श्रीशुक उवाच ॥

इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ॥
विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥ २८ ॥

इति यथोक्तप्रकारमत एव विगतं प्रियं यस्मात् तद्विप्रियम् । नच प्रियवचनेऽपि विप्रियत्वभ्रमः । यतो भाषितम् । भाष व्यक्तायां वाचीति स्मरणाद् व्यक्तं—प्रतियात व्रजमित्यादि स्पष्टनिषेधरूपम् । ननु यथावदश्रवणे, स्पष्टार्थकमपि वाक्यमन्यथा प्रतीयत इत्याशङ्कानिरासायाह ॥ आकर्ण्य ॥ समन्तान्मनो दत्वा अक्षरशः श्रुत्वा

तत्रापि तात्पर्यावधारणपर्य्यन्तं श्रुत्वा । एतेन तद्वाक्यपरीक्षार्थत्व-मपि वारितम् । तत्रापि गोविन्दस्य, गां वेदादिरूपां वाणीं वि-न्दतीति गोविन्दस्तस्य वेदार्थसम्प्रदायप्रवर्तकस्य सर्वज्ञस्य परमा-प्तस्य भाषितम् । प्रतारकभाषिते हि संशयो भवति—किमभिप्रा-येणानेन प्रयुक्तमिदं वाक्यम् इति, न तु परमाप्तभाषित इति भावः । एताश्च गोप्यः स्वीयत्वात् प्रतारणाऽयोग्यास्तस्माद्यथार्थं गमनमेव वदतीति तद्वाक्यान्निश्चित्य । अहो गृहादिकं त्यक्त्वा वयं समागता वान्ताशनमिव पुनस्तद् ग्रहीतुमशक्ता भगवद्वाक्योल्लङ्घने चाऽक्षमा इति विचार्य्योभयविरोधे शरीरपरित्याग एव कर्तव्य इति निश्चित्य, विषण्णा = विषादम् इतिकर्तव्यतायां मूढतां गताः। यतो भग्नः सङ्कल्पो भगवत्सङ्गमानन्दविषयको यासां ताः । दुर-त्ययां जन्मान्तरेऽप्यनिवर्त्यां चिन्ताम्—अहो भगवता किमिदमु-क्तं, परं किं भविष्यतीत्येवमादिरूपां प्रापुः ॥ अनभिज्ञापक्षे, इति यथोक्तं गोविन्दस्य भाषितं प्रियार्थकमप्युत्कण्ठास्वभावादप्रियमेव निर्धार्य्य। गोवर्द्धनधारणादिना सर्वदा रक्षापरायणस्य महात्मनः स्वामिन इदं वाक्यमतो नानृतमिति तासां चित्ते प्रतीतिर्जातेति बोधयितुं गोविन्दपदम् । नैपुण्यराहित्येन यथाश्रुतार्थमात्रग्रहणस-मर्था इति द्योतनाय गोप्य इत्युक्तम् । ततो विषण्णाः परमखिन्नाः, यतो भग्नस्तद्रतिविषयः सङ्कल्पो मनोरथो यासां ता दुरत्ययामनन्ता-श्चिन्तामापुः । अहो कलगीतमाकर्ण्याह्वानभ्रमात् कुलधर्मधैर्य्य-भयलज्जादिकं विहाय वृथैवात्र समागताः, प्रेमार्द्रोऽप्ययमस्मद्भा-ग्येन कठोरतां गतः, किं वाऽस्मत्परीक्षार्थं दाक्षिण्यं विहाय वामता-मङ्गीकृतवान्, किं वाऽस्य मनसि प्रेमलेशोऽपि नासीद्, भ्रमादेव जन्मप्रभृति एतस्मिन् वयम् अनुरक्ताः, किं वाऽस्मदीयं कञ्चिदप-राधमनुसन्धाय तद्दण्डदानायोद्यतस्तत्‌ः किममुं नत्यादिभिरनुनयामः,

किं वा प्रतिवचनेन व्रजं प्रति निवृत्त्या वैतदाशयं निर्धारयेम, एतदाज्ञापालनं वा करवाम । एतदादिष्टं वान्ताशनसमं पत्याराधनं तु कथं कर्तुं प्रभवाम । किञ्चैतत्समक्षे यमुनाप्रवेशादिना सद्यः प्राणाँस्त्यजेम । एवं चेत् पुनरेतन्मुखसरोजं कथं पश्याम, एतदनुज्ञां विनाऽत्रापि स्थातुं कथं प्रभवाम । अहोऽतिकष्टं, किं कुर्मः, क्व गच्छाम इत्येवमादिरूपां चिन्तां प्राप्तवत्यः ॥ मानिनीपक्षे, इति विशेषेण प्रियं गोविन्दभाषितमाकर्ण्य विषण्णा भग्नसङ्कल्पा इव दुरत्ययां चिन्तां प्रापुरङ्गीकृतवत्यः ॥

निवृत्तिपक्षे, इत्येवं विगतं प्रियं गोविन्दस्य वेदबाह्येभ्यो वेदत्राणाय स्वीकृततत्तद्रादिविग्रहस्य भाषितमाकर्ण्य विषादं प्राप्ताः । यतो भग्नः प्रत्यगभिन्नब्रह्मप्रतिपादनसङ्कल्पो यासां ता. । गोप्यः परमात्मसम्बन्धिन्यः श्रुतयो दुरत्ययां चिन्ताम्, आस्तिका अप्यस्मन्नाशाय प्रवृत्ता, अहो कथं भविष्यतीत्येवंरूपां प्रापुरित्यर्थः॥ २८

चिन्ताप्राप्तौ सत्यामवस्थानमाह ॥

कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्-
बिम्बाधराणि चरणेन भुवं लिखन्त्यः ॥
अस्रैरुपात्तमसिभिः कुचकुङ्कुमानि
तस्थुर्मृजन्त्य उरुदुःखभराः स्म तूष्णीम् ॥२९॥

कृत्वेति ॥ अवशुचः प्राप्तशोकाः श्वसनेन शुष्यद्बिम्बाधराणि मुखानि कृत्वा । यद्वा मुखानि अव अवाञ्चि अधो मुखानि कृत्वा मुखानां तथा करणं च कासाञ्चिदहोऽस्माकं नास्त्यद्यापि प्रेमोद्रेको, नो चेत् तेन वशीकृतो भगवान्नैवं ब्रूयादित्यभिप्रायेण १. कासाञ्चिदहो परमप्रेमास्पदेन भगवतैवमनङ्गीकृतानामस्मा-

कमूदुर्धर्मधो वा काप्यवस्थातुं योग्यता नास्तीत्याशयेन २ कासा-
ञ्चिदहो सर्वगुणगणालङ्कृतविग्रहस्य करुणासागरस्य सर्वज्ञस्य
भगवत एवंविधोक्तिर्मन्दभाग्याऽस्मल्ललाटदर्शनजन्याऽतः स्वल-
लाटमस्मै न प्रदर्शनीयमित्यभिप्रायेण ३ कासाञ्चिदहोऽस्मदीयं क-
श्चिदपराधं स्मृत्वा भगवानेवं वदतीत्यतो नम्रीभूय क्षमापनीय इ-
त्याशयेन ४ कासाञ्चिदहोऽस्माकं वनभूमौ निकृष्टजनवदागमनं
निष्फलमेव सम्पन्नमित्याशयेन ५ । अधः कृतानि मुखानि वि-
शिनष्टि ॥ शुचः शोकादुद्भूतेन शोकसम्बन्धिना वा श्वासवायुना
शुष्यन्तः शोषं गच्छन्तो बिम्बफलतुल्या अधरा येषु। शोकानल-
ज्वालाव्याप्तश्वासेन शुष्यन्तः शुचः शुचेराघटस्य श्वसनेन वायुना
शुष्यद्बिम्बसदृशा अधरा येष्विति वा । एवंभूतश्वसनेनाधरा-
दिसमस्तशरीरं शोषयित्वा दीपयिष्याम इत्याशयः । चरणेन वाम-
पादाङ्गुष्ठैर्भुवं लिखन्त्यः । काश्चिदहो श्रुत्यादिरूपं तिरोधाय
भूमौ गोपाङ्गनाविग्रहो वृथैव अस्माभिराश्रित इति पश्चात्तापं
सूचयन्त्य इव । अहो किं भूमिभारभूता अस्मानेव निश्चित्यानेन
प्रकारेणास्मन्नाशायाऽयमवतीर्ण इति। काश्चिदहो भगवतीं सीता-
मिवास्मानपि भूमिं प्रवेशयितुं प्रवृत्तोऽसीति । तथा व्याप्तकज्ज-
लैरश्रुभिः स्तनकुङ्कुमानि क्षालयन्त्यः । अहो नास्तीदानीं नेत्र-
स्थकज्जलस्य स्तनस्थलकुङ्कुमस्य च किमपि प्रयोजनमतः क्षा-
लनीयमुभयम् । तत्क्षालनं चास्मिन् समयेऽन्यजलालाभादश्रुज-
लैरेव कार्यम् । कुचेषु च इतः परं मषीलेपो विधेय इति सूचयन्त्य
इव । मृजन्त्य इति वर्तमानापदेशेन मार्जनाय प्रवृत्ताभिरपि, यमा-
ऽनुजाप्रवाहतुल्याभिरश्रुधाराभिस्तन्मार्जनं न सम्पन्नमेव।दवानलप्र-
तापसन्तापशोष्यमाणत्वादिति ध्वनितम् । उरुभरपदाभ्यां दुःख-
स्य पराकाष्ठोच्यते । महादुःखातिशयवत्यो दुःखसागरनिमग्नाः

सयः किञ्चिदपि वक्तुमशक्तत्वात् तूष्णीं तस्थुः स्मा।मुखस्यावाक्-त्वेन भगवदाभिमुख्यस्य, शोकेनाऽन्तःकरणस्य, बिम्बाधरशोषेण कामरसस्य, पदा भूमिलेखने शरीरस्य, अस्रैरिन्द्रियाणां, कुङ्कु-माभावेन कान्तेः, उरुदुःखभरेणानन्दस्य, तूष्णींस्थित्या चैतन्यस्य च तिरोभावाभिधानात् । श्वसनेनेति प्राणपीडाकथनान्मूर्च्छिताः केवलं स्थाणुरिव स्थिता इत्यर्थः ॥ अनभिज्ञापक्षे—मुखानामधः-करणं कासाञ्चिदहो वयमत्रागताः सम्मानार्हा अप्येतेन न स-म्मानिताः, प्रत्युत, प्रति यातेत्यादिवाक्यैरेव मानिता इति लज्जा-सागरनिमग्नहृदयत्वेन। कासाञ्चिदहो पत्यादिकं विहायैवंविधं कर्म कर्तुं प्रवृत्तानामप्यस्माकं प्रवृत्तिर्निष्फला जाता, इतः परं किं करिष्याम इति लज्जाव्याकुलचित्तत्वेन । कासाञ्चिदहो एतेना-ऽनाहूता वंशीशब्दमाकर्ण्याह्वानभ्रमेणैव समागता, अतोऽस्माकं मौर्ख्यमेव प्रकटितमिति लज्जया । कासाञ्चिदहो एवंविधां दशां प्राप्ता, इतः परं व्रजं गताः कथं तत्र सखीजनेभ्यो मुखं प्रदर्शयि-ष्याम इति लज्जया । कासाञ्चिदहो विनाऽऽह्वानमागता, इतः परं दृष्टो भवदीयसौभाग्यदर्प इति वदतोऽस्य कृष्णस्य समक्षे मुखं कथं करिष्याम इति लज्जया । कासाञ्चिदहो सर्वालङ्कारालङ्कृ-तमप्यस्मदीयं मुखमस्मै न रोचते, एतत्समक्षस्थापनाऽयोग्यमिति लज्जया । कासाञ्चिदहोऽस्मन्मुखमवलोक्याऽस्य महानानन्दो भ-विष्यतीत्याशया समागतानां परं विपरीतं जातमिति लज्जया । कासाञ्चिदहोऽस्मदन्तःकरणनिविष्टप्रेमातिशयमनवबुद्ध्यैतेनैवमुक्त-मतोऽनभिज्ञसमीपे एवमागमनम् अनुचितं जातमिति लज्जया । कासाञ्चिदहो नास्त्ययं कान्तानां सर्वथा नेतिनेतीत्येव वदन्तीनां स्वभाव एवम्भूताऽनर्थकरो योऽस्माभिरङ्गीकृतोऽतस्ताभिरुपहास्या भविष्याम इति लज्जाविष्टचित्तत्वेन। कासाञ्चिदहो इयं मां किं त्व-

दिष्यतीयं मां किं कथयिष्यतीति परस्परमाप्तलज्जया । कासाञ्चिदहो एतन्मुखनिःसृतैवंविधोक्त्यनलज्वालया वृथाऽस्मन्मुखदाहो मा भवत्वित्याशयेन । कासाञ्चिदहो यद्यप्ययमेवमस्मद्दुःखायोद्युक्तस्तथाऽपि प्रज्ज्वलिताऽस्मदन्तःकरणान्मुखनेत्रादिद्वारा निःसृताभिरतिप्रचण्डज्वालामालाभिः सन्तापं न प्राप्नुयादित्याशयेन। कासाञ्चिदहो पूर्वं प्रसन्नचेतस्तया वने विहरणपरो वंशीवादनिरतोऽप्यस्मन्मुखं दृष्ट्वैवंविधं क्षोभं गतोऽतोऽस्मै क्षोभकरं स्वमुखं न प्रदर्शनीयमित्यभिप्रायेण । कासाञ्चिदहो नेत्रद्वारा काश्चिन्मोहनशक्तिमस्मदन्तःकरणे प्रवेश्याऽस्मान् व्यामोहयतीत्येतन्नेत्रसमक्षे स्वनेत्रस्थापनं न कार्यमिति भावेन । कासाञ्चिदहो शोकाक्रान्तमस्मन्मुखमवलोक्य कोपाक्रान्तमेतदीयं मुखमिति भ्रान्त्यैतोऽप्यधिकमस्यौदासीन्यं मा गच्छात्वित्याशयेन । कासाञ्चित् तथाभूतोक्तिजन्यशोकोद्भूतसमुद्रकल्पाश्रुजलप्रवाहभाराक्रान्तशिरस ऊर्ध्वस्थापनाऽशक्त्या । कासाञ्चिदेवम्भूतमप्यस्मदीयं मुखमस्य प्रीतिकरं न भवति, किमुताश्रुधारासम्पर्कमलिनीकृतमतः शोकोद्भूताश्रुप्रवाहोऽधः पातनीय इति प्रेष्टचेतसि प्रीत्युत्पत्त्याशया । कासाञ्चिदहो धिक् स्त्रीचाञ्चल्यं, येन प्रीतिलेशेनापि हीनस्य पाषाणवदतिकठिनस्वान्तस्य समीपेऽतिरभसा समागता, अतः परं त्वस्य स्वयमाहूयैवं वक्तुं प्रवृत्तस्य कृतघ्नस्य मुखमपि नावलोकनीयमित्याशयेन । कासाञ्चिदहो विधातरतिकठोरान्तःकरण! परदुःखानभिज्ञ! दुःखपात्रभूता अस्मान् विनिश्चित्याऽतिदुःखं दातुं प्रवृत्तोऽसि, भवतु, शपथोऽस्ति तव, यदि यावत्सामर्थ्यं दुःखं न प्रदास्यसि, तस्मादितोऽप्यधिकं दुःखं यद्यस्ति तव समीपे तर्हि तदप्यस्मभ्यं प्रयच्छ, विलम्बं मा गच्छेदं शिरस्तवाग्रेऽस्माभिः स्थापितमिति विधातरि कोपावेशेन । कासाञ्चिदहो परस्परनेत्रसं-

योगवशात् परस्परभावविपर्ययो जातः—एतस्य कान्तस्य दाक्षिण्यरूपः स्वभावोऽस्मच्चेतसि प्रविष्टः, कान्तानामस्माकमवहित्थालक्षणः स्वभावोऽस्य मनस्यऽतस्तथा मा भवत्वित्याशयेन । कासाञ्चिद् अहो बहूक्तं त्वया, भवत्वन्यदपि यद् वक्तव्यं तद् वदस्व, इदं शिरस्तवाग्रे स्थापितमित्यभिप्रायेण । कासाञ्चिदहो एवंविधोक्तिनाराचधारया पुनः पुनः किमर्थमस्मद्वधने प्रवृत्तोऽसि, यदि मारणीया एव वयं तर्हि सकृदेव तीक्ष्णाऽसिना ग्रीवोपरि निपातितेनाऽस्माकं शिरांसि छिन्धीत्याशयेन ।कासाञ्चिदहो कृतम एवंविधव्याहारप्रयासेन, तं विनैव नवसौन्दर्य्यशस्त्रोन्मूलितगर्वद्रुमाणामस्माकं सर्वदैव नम्रीभावोऽस्तीति भावेन। कासाञ्चिदहो विधातः त्वया किमेवंविधमस्मदीयं मुखं रचितं, यदस्य गोपालबालस्यापि प्रीत्यजनकत्वात् तत्समक्षे स्थापयितुमयोग्यमिति पश्चात्तापेन । कासाञ्चिदहो मानलेशेनापि विनिर्मुक्तानामेतासां धिक् स्त्रीत्वमिति विमानस्थदेवाङ्गनादिकृताऽवज्ञानभयेन । कासाञ्चिदहोऽयं चोरचक्रवर्ती वंशीरवेण स्वभृत्येनास्मदीयमनोरत्नमञ्जूषामपहृत्य परमसाधुवदेवं वदतीत्यतोऽस्माद्बिभेतव्यमिति भावेन ।कासाञ्चिदहो किमस्मानेवमुपदिशसि, न वयमुपदेशार्थं तव समीपमागताः, स्वयमेव उपादिशसि चेत् तर्हि विषसम्पृक्तमिष्टान्नवत् तथाभूतोपदेशे कृते, त्वन्मुखं नावलोकनीयमित्यभिप्रायेण ।कासाञ्चिदहो निरर्थकोऽयमुपदेशः, त्वत्सम्बन्धेनाऽधोगमनस्याप्यस्माकमिष्टत्वादिति द्योतनाय। कासाञ्चिदहो गोवर्द्धनाधस्तात् स्वहस्तेन वधार्थमेव किं वय रक्षिता इति सूचनाय । कासाञ्चिदहो सर्वं त्वत्तोऽधोभूतमेव ज्ञात्वा वयमागता, अतः किमर्थमेवं बहु भाषसे इति ज्ञापनाय। तथा शुचः शोकादुद्भूतेन श्वसनेनोष्णश्वासेन शुष्यन्तः, सूर्य्यातपेन शोषे सति विगतस्थौल्यैः स्पष्टवलिमद्भिर्बिम्बफलैः सदृशा

अधरा येषु । अस्मदधराऽमृतं प्रियो धास्यतीत्याशया समागतानां तदाशाभङ्गोत्थशोकानलस्तच्छोषणे प्रवृत्त इति भावः । पुनश्चरणेन वामपादाङ्गुष्ठेन भुवं लिखन्त्यः । काश्चिदहो नास्ति तवापराधः, किन्त्वस्माकमेव । यतो यस्मिन् काले, याताऽबला व्रजे सिद्धा मयेमा रंस्यथ क्षपा * इति त्वयोक्तं, तदा, कुहकशिरोमणेस्तव वचसि कृतविश्वासाभिरस्माभिर्लेखापयित्वा न स्थापितमतोऽधुना किं कुर्मोऽस्मन्मौर्ख्यमेवास्माकमनर्थकरं सम्पन्नमिति ध्वनयन्त्य इव । काश्चिन्मद्वचनसाक्षी कोऽपि नास्तीति निर्भयता नोचिता, किन्तु सर्वाधारभूता भगवती वसुन्धरा साक्षिभूता विद्यत एवेत्यस्या एव विभेतव्यमिति सूचयन्त्य इव । काश्चिद् भुवनैकसुन्दरेण जारेण गृहीतचेतसां नास्त्यस्माकं तथाविधं पातिव्रत्यं किमर्थमेवं वक्तुं प्रवृत्तोऽसीति बोधनाय जारवतीलक्षणं स्वस्मिन् दर्शयन्त्य इव । काश्चिदहो वृथैव मुखाद्यलंक्रियाऽतः परं मृदमुत्पाद्य तया सर्वाण्यङ्गानि लेपनीयानीति शोकोद्भूतमुत्कटवैराग्यं बोधयन्त्य इव । काश्चिदहो भूमिरपीयमस्मदपेक्षया वरा, यस्यामस्मत्प्रेष्ठपादारविन्दसंस्पर्शः सदैवास्तीति ज्ञापयन्त्य इव । काश्चिदहो यादृशं दुःखमनेनास्मभ्यं दत्तं तादृशं दुःखमस्मै प्रदेयं, तच्चाऽस्मदङ्गसंस्पर्शादेवास्य भविष्यतीत्यत्युग्रं तपः सम्पाद्य भूमिभावं प्राप्य स्वाङ्गसंस्पर्शनेनाऽयं पीडनीय इति ध्वनयन्त्य इव । काश्चिदहोऽस्यामस्मद्व्रजभूमावेवं विधातिकठोरचित्तः कोऽपि नास्त्यतोऽयमीदृशः कथमत्र जात इति सूचयन्त्य इव । काश्चिदहो किमेवंविधम् अन्यायं कर्तुं प्रवृत्तोऽसि, किं भूशर्कराद्यपेक्षयाऽप्यस्मदीयानि स्तनाद्यङ्गानि कर्कशानि यत्संस्पर्शजन्मदुःखभयादेवं जल्पसीति सूचयन्त्य इव । काश्चिदहोऽस्मद्दुःखाय यत् त्वयाऽऽचरितुमारब्धं तदस्माभिर्लिखित्वा स्थाप्यतेऽस्मिञ्जन्मनि जन्मान्तरे वाऽस्य

प्रतीकारं करिष्याम इति ज्ञापयन्त्य इव । काश्चिदहोऽस्याश्चर्य्यमेवं-विधमिथ्याप्रतिज्ञमियं भूमिर्धारयसेतदाधारेण विदीर्णा न भवतीति सूचयन्त्य इव । काश्चिदहो मातर्वसुधे! नास्त्यस्मत्साहाय्यकृत् क-श्चिद्ऽतस्त्वयैवाऽयं बोधनीयोऽस्य त्वयि प्रीत्यातिशयस्य दर्शनादि-ति भूमिं प्रार्थयन्त्य इव । काश्चिदहोऽस्य पाषाणवदन्तःकरणमति-काठिनमऽस्मत्प्रेमोद्रेकातिरेकं भूमिर्न जानासत एवंविधदुःखम् अव-लोक्यापि न द्रवतीति ध्वनयन्त्य इव । काश्चिदहोऽस्य हृदयं पा-षाणादपि कठोरं, यत एवम्भूतातिकष्टे सत्यपि न विशीर्यत इति सूचयन्त्य इव । काश्चिदहो नास्तीतः परं जीवनकृत्यमतो, भो मातर्वसुन्धरे कृपया निशीर्णा भव, त्वयि प्रावेशाम इति भूमिप्रवेशा-ऽऽभिमुख्यं बोधयन्त्य इव । पुनश्चोपात्तमषिभिः कज्जलाक्तैरस्रैः कुचकुङ्कुमानि मृजन्त्यः । अहो नेत्रस्थश्यामतैवानर्थकरी, यया-ऽतिनिष्ठुरान्तःकरणे कृष्णे स्नेहमुत्पाद्यैवंविधां दशां वयं नीताः । अतो मस्या सह साऽपि निःसारणीया । यत एवंविधचक्षुष्मत्ता-ऽपेक्षयाऽन्धतैवास्माकं श्रेयस्करीत्याशयः । अनेन त्वत्प्राप्त्याशानि-वृत्त्या काष्ठभूतेष्वस्मच्छरीरेषु निःसीमतापक्रकचेन विदारणाय विरहतक्षकृतं श्यामसूत्ररेखाद्वयमस्त्यपि ध्वनयन्त्य इव । अस्रैरिति बहुवचनेन तत्प्रवाहधारा बोधिता । मृजन्त्य इति वर्तमानापदेशेन नयनोत्थयमुनाद्वयकल्पाऽश्रुधाराद्वयस्य कुङ्कुममार्जनाद्युद्युक्तस्य हृदयोत्थसंतापानलस्य तच्छोषणोद्युक्तस्य विवादे कस्याऽपि जयो वा, पराजयो वा न संवृत्त इति द्योतितम् । उरुदुःखस्य भ-रो भारो यासां ताः । भारासहिष्णुतयैवं चेतनापगमात् तूष्णीं पा-ञ्चालिका इव तस्थुरित्यर्थः ॥ मानिनीपक्षे. मुखानाम् अधः करणं कामाश्चिन्न परपुरुषमुखावलोकनमप्यस्मभ्यं न रोचते इति सूचना-ऽर्थम् । कासाञ्चिद्ऽस्मन्मुखावलोकनमपि तवाऽतिदुर्लभम्, अ-

न्यत्तु दूरनिरस्तमित्यतिदर्पख्यापनार्थम् । कासाञ्चिदहो न वयं व्यभिचारिण्यः, किन्तु कुलाङ्गनास्तल्लक्षणस्यास्मासु सत्त्वादिति ज्ञापनाय । कासाञ्चिदहो कृष्ण! त्वं त्वतिधूर्तोऽसि, परदारानेवं प्रार्थयन् लज्जालेशेनापि विनिर्मुक्तोऽसि । वयं तु लज्जासागरे निमग्ना इति स्वस्य लज्जावत्तीत्वबोधनाय । कासाञ्चिदहो अधोगतिसम्पादकमौपपत्यं धर्मशास्त्राभिज्ञानामस्माकं सर्वथा परिहरणीयमिति स्वस्य परलोकभयाविष्टताख्यापनाय । कासाञ्चिदहो वयं लोकमर्य्यादाऽभिज्ञा अधोमुखतापादकं कर्म कर्तुं नार्हाः, किमर्थमेवं बहु जल्पसीति स्वस्यापकीर्तिभयाविष्टताख्यापनाय । कासाञ्चिदन्तःकरणस्थामुत्कण्ठां मुखादिविकासमवलोक्यायं माऽवगच्छत्विस्याशयेन । अहो स्वपतिविरहजनितशोकोद्भूतौष्ण्यव्याप्त एतासां श्वास इति प्रतीतिजनकेन श्वसनेन, यद्यप्यस्मदधरपानाऽऽशा तव महती वर्तते तथापि तत्सिद्धिः स्वप्नेऽपि दुर्घटा, प्रबलेन त्वया बलात्कारेणाऽबलानामस्माकमऽधराऽमृतपाने क्रियमाणे तत्स्थं पीयूषं तु न लप्स्यसि, तस्य शोष्यमाणत्वादित्याशयः ॥ चरणेन भुवं लिखन्त्यः ॥ काश्चिदस्मत्पादरजोऽपि तव दुर्लभतरम्, इतरत्तु दूरगतमिति ध्वनयन्त्य इव । काश्चिद् भूमिप्रवेशं करिष्यामस्तव वशीभूतास्तु न भविष्याम इति सूचयन्त्य इव । काश्चिद् बलात्कारेण स्पर्शादिकं करिष्यसि चेत् तर्हि भूमिपतये नन्दाय, कंसाय वा गत्वा कथयिष्याम इति द्योतयन्त्य इव । अहो बलात्कारेणाऽयमस्मान् ग्रहीष्यतीति भयादिव मृषाऽश्रुभिस्त्वदर्थमस्माभिर्नेत्रेषु मषिर्न धृता, तव तथा भ्रमश्चेत्तर्हि सा-द्यते इत्याशयेनोपात्तमषिभिः कुचकुङ्कुमानि मृजन्त्यः । न त्वदर्थं कुचेषु कुङ्कुमान्यऽस्माभिरुपलिप्तानि, तव तथा भ्रमश्चेत् तर्हि तानि प्रक्षाल्य तेषु मषिलेपोऽस्माभिः क्रियते इति सूचय-

न्स इव । मार्जनादेरकृतत्वान्मृजन्त्य इत्युक्तम् । उरुदुःखभरा इव तूष्णीं तस्थुः स्म ॥

निवृत्तिपक्षे, यथोक्तवाद्युक्तयुक्तिभिः श्रुतीनां महती पीडा जातेत्याशयेनाह ॥ कृत्वेति ॥ चरणेन मूलरूपेण भुवं स्वाद्युत्पत्तिस्थानं परमात्मानं लिखन्त्यस्तत्प्रतिपादने मुख्यतात्पर्य्यवत्यः सर्वाः श्रुतयः, अवशुचः प्राप्तशोकाः सत्यः, श्रुत्यन्तभागलक्षणानि मुखानि, वाद्युक्तस्वार्थलक्षणेन श्वसनेन शुष्यद्बिम्बाधरस्थानीया मोक्षप्रतिपादनभागा येषु तथाभूतानि कृत्वा, अस्त्रैः स्वरुधिरास्त्रभूतैर्लाक्षारसैरुपात्तमषिभिस्तत्तद्वादिकरस्थलेखिन्यारूढैः, कुचस्थानीयानां सन्दिग्धकठिनभागानां समीचीनाऽर्थलक्षणानि कुङ्कुमानि मृजन्त्य उरुदुःखभरास्तूष्णीं तस्थुः स्म । उपरुद्धा जाता इत्यर्थः ॥ २९ ॥

ततो विनिवृत्तमूर्च्छास्तूष्णीं स्थितं भगवन्तमालक्ष्य किञ्चिद् विज्ञापयामासुरित्याह ।

प्रेष्टं प्रियेतरमिव प्रतिभाषमाणं
कृष्णं तदर्थविनिवर्त्तितसर्वकामाः ॥
नेत्रे विमृज्य रुदितोपहते स्म किञ्चित्-
संरम्भगद्गदगिरोऽब्रुवताऽनुरक्ताः ॥ ३० ॥

प्रेष्टमिति ॥ गोप्यो रुदितोपहते नेत्रे विमृज्य, अहो यद्भवितव्यं तद्भविष्यत्येव, संप्रति भगवद्दर्शनं तु सम्यक् कर्तव्यमित्याशयः । कृष्णमब्रुवत स्म । भगवतः सदानन्दरूपत्वात् तदाभिमुख्यमेव सदानन्दाविर्भावकरमतः सर्वानर्थकरं तद्वैमुख्यं कथमपि नोचितमिति भावः ॥ प्रेष्टं परप्रेमास्पदत्वादात्मानं, प्रियेतरमिवाऽना-

त्मन्नेव प्रतिभाषमाणं प्रत्याचक्षाणम् । अहो सर्वात्मा सन् किमर्थमेवं वदतीति किंचित्संरम्भेण प्रणयकोपेन गद्गदा अस्फुटस्खलिताऽक्षरा गीर्यासां ताः । ननु भगवति ईषत्संरम्भोऽप्यनुचितः, तासां मुखाद् भगवद्वाक्यप्रत्युत्तररूपा वाणी च कथं निःसृता इतिचेत् तत्राह ॥ अनुरक्ता इति ॥ स्वल्पस्यापि रागस्य भयनिवर्तकत्वात् परमानुरागवतीनां तासां का भयसम्भावनेति भावः । यतः, तदर्थविनिवर्तितसर्वकामाः ॥ तदर्थं भगवदर्थं विशेषेण तद्वासनासाहित्येन निवर्तिताः सर्वे कामा याभिस्ताः । तथाच भगवदतिरिक्तसर्वकामस्य तदिच्छायाश्च सत्त्वाद्भगवद्विषयककामस्य च मोक्षकामवदकामरूपत्वात् तन्मात्रनिष्ठानां तदनुरक्तचेतसां नास्ति किञ्चिदपि भयमिति भावः ॥ अनभिज्ञापक्षे, तथाभूतां दशां प्राप्ता अपि ताः, अहो किमित्येवमरण्यरोदनं कर्तुं प्रवृत्ताः, स्वस्थाः प्रसन्नमुखाः सद्यः स्वस्वगृहं तूर्णं किं न गच्छत इत्येवं प्रहसन् यदोच्चैरुवाच तदा तानि वाक्यानि तासां कर्णाऽध्वनाऽन्तःप्रविष्टानि । ततश्च तैरेवोद्बोधितास्तत्सजातीयवाक्यैर्भगवद्वाक्यानां प्रत्युत्तरं वक्तुमारेभिर इत्याशयेनाह ॥ प्रेष्ठमिति ॥ बहुकालमारभ्य परप्रेमास्पदत्वेन निश्चितमिदानीं, प्रियेतरमिव, यथा प्रियेतरः शत्रुर्वदति तथा—प्रतियातेत्यादिवज्रादप्यतिकठोरं प्रत्याख्यानरूपं वाक्यं भाषमाणम् । प्रियेतरमिव अप्रियवाक्यसदृशं वाक्यमिति वा । तत्रापि, कृष्णं सम्प्रत्यपि वेणुनादेन चित्तरत्नं मञ्जूषाया आकृष्य सौचित्येन स्थितम् । अत एव, तदर्थं विनिवर्तितसर्वकामाः रुदितोपहते अन्धीभूते नेत्रे विमृज्य, अहो मरणसमयोऽयमस्माकमागतस्तस्मात् सकृदपि प्रेष्ठस्य मुखपद्ममवलोक्य मरिष्याम इत्याकाङ्क्षयेति भावः । अहो प्रकृष्टत्वेनाश्रितोऽयं विनाऽपराधं कथमेवंविधप्राणान्तदण्डं दातुमुद्यत इति संर-

म्भः । स्वस्मिंस्तदङ्गसङ्गायोग्यतां विचार्य्य तच्छैथिल्यमिसतः किञ्चित्संरम्भेणेत्युक्तम्। ननु सर्वथाऽपि प्रेमशून्येन तेनालं भाषणादिनेति चेत् तत्राह ॥ अनुरक्ता इति ॥ अनुरागादन्यविचाररहितत्वात्प्रत्याख्याता अपि पुनस्तत्रैवानुरज्यन्त इति भावः॥ मानिनीपक्षे, वस्तुतः परमप्रियं प्रियेतरमिव प्रतीयमानं वाक्यं प्रतिभाषमाणं कृष्णमब्रुवत स्म । अहो कथमस्मान् परदारानित्थं वदसीति कोपेनाऽन्तःकरणस्थोत्कटोत्कण्ठया शिथिलीकृतत्वात् स्वल्पेन गद्गदभूता गिरो यासां ताः । यथोक्तं प्रार्थनारूपं वाक्यमाकर्ण्य ततोऽप्यधिकमनुरक्ताः ॥

निवृत्तिपक्षे॥ प्रेष्ठम् ॥ सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्य इत्यादिश्रुतिस्मृतिभ्यो वेद्यत्वेनात्यर्थमभिमतम्। तत्तद्द्रादिरूपेण श्रुतीनां ब्रह्मणि प्रामाण्यं नास्तीत्येवमादिरूपं प्रियेतरमिव प्रतिभाषमाणं प्रत्याचक्षाणं कृष्णं,फलरूपं सदानन्दात्मकं परमात्मानं तदर्थं परमात्मप्राप्त्यर्थं विशेषेण निवर्तिता अधिकारिणां सर्वे कामा याभिः । तथाच श्रुतिः— यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः * तदा मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इत्याद्याः । रुदितेन स्वार्थानभिज्ञत्वाद्यभिहिततर्कैकृतेन रुदितेनोपहते नेत्रे यथाभूतार्थप्रकाशनसमर्थे शक्तिलक्षणालक्षणे विमृज्य किञ्चित्संरम्भेण, अहो आस्तिकरूपेण स्थितोऽपि भगवानित्थं वदतीति ईषत्कोपेन गद्गदाश्छन्दसां गिरो यासां ताः । किञ्च, तस्मिन्नेवाऽनुरक्ताः ॥ ३० ॥ ॥ तदुदाहरति ।

गोप्य ऊचुः ॥

मैवं विभोऽर्हति भवान् गदितुं नृशंसं
सन्त्यज्य सर्वविषयाँस्तव पादमूलम् ॥

भक्ता भजस्व दुरवग्रह मा त्यजाऽस्मान्
देवो यथादिपुरुषो भजते मुमुक्षून् ॥ ३१ ॥

मैत्रमिति ॥ यद्यपि वयं निकृष्टास्तथापि सर्वोत्तमो भवान् षड्विधैश्वर्य्यसम्पन्नः, प्रतियातेत्येवंरूपं नृशंसं क्रूरमस्मत्प्राणापहरणसमर्थत्वाद् घातुकम्। नृशंसमिति किञ्चित्संरम्भाविष्कारः। यद्यपि भगवता प्रथमं, स्वागतमित्यादिना स्तुतास्तथाप्यऽग्रे,प्रतियातेति प्रतिगमनाभिधानात् तदपि नास्माकं प्रेमातिरेकवर्णनाभिप्रायकमपि तु व्यङ्ग्योत्पत्त्योपहासपरमतस्तदपि नृशंसमेव । परिच्छिन्नस्य परकीयान्तःकरणवृत्त्यनभिज्ञस्यैवंविधोक्तिः कदाचिद् घटते, न तु विभोर्व्यापकस्य सर्वाऽन्तरवस्थितत्वात् सर्वान्तःकरणवृत्तिसाक्षिण इत्याशयेन सम्बोधयति ॥ विभो इति ॥ अत एव व्रजस्याऽनामयं कच्चिदिति प्रश्नोऽपि न संगच्छते। तत्कुशलाकुशलयोरुदासीनभूताऽस्मदन्तःकरणवृत्तिज्ञत्वादित्याशयेनाहुः ॥ संत्यज्येति ॥ व्रजस्य का कथा, अस्माभिः शब्दस्पर्शादयः सर्वेन्द्रियाणामपि विषयाः सम्यग्वासनोच्छेदपर्य्यन्तं त्यक्ताः । संत्यज्य च पादमूलं भक्ताः। तत्त्यागस्तव पादमूलभजनार्थमेव, न तु फलाऽन्तरमस्माकमपेक्षितमित्यर्थः । सर्वविषयानित्यनेन त्वद्विषयकः कामः कामो न भवतीति ध्वनयन्ति । अस्मदन्तःकरणात् सर्वे विषया यदि निरस्ता न स्युस्तव पादमूलभक्तिः कथं तत्राविर्भवेत् तथाच मैत्र तत्त्यागसाक्षिणीत्यप्यनेन द्योतितम् । यच्च भगवतोक्तं— प्रियं किं करवाणि वः, व्रजागमनकारणमिति तत्राप्याहुः ॥ भजस्वेति ॥ तथाच भवद्भक्तानामस्माकं स्वीयत्वेन ग्रहणमेवास्मत्प्रियं भगवता कर्त्तव्यम्, एतदतिरिक्तं किमप्यस्माकं प्रियं नास्त्येतदेवास्मदागमनप्रयोजनमतस्तदेव संपादयेत्याशयः । तस्मात् प्रतिया-

त्र व्रजं, नेह स्थेयमिति त्यागाग्रहो भगवतो नोचित इत्याहुः ॥ हे दुरवग्रह, मा त्यजास्मान् । मद्भजनं न कर्तव्यमित्येवमाग्रहो दुष्टो भवति । सर्वैः कर्तव्यं भगवद्भजनं, न कार्यमिति दुष्ट आग्रहो जीवानां वर्तते । परमेश्वरस्याऽप्युक्त आग्रहश्चेत् तर्हि कथं जीवानामुद्धारः । तस्मादस्माकमेव केवलमभाग्यवशादुक्त आग्रहो भगवता आश्रित इति सम्बोधनाशयः । ननु न मया स्वभजनं निषिद्ध्यते, किन्तु कामोपाधिकं तदिति चेत् तत्राहुः ॥ देव इति ॥ यथा, देव आदिपुरुषः = अवतारिपुरुषो, ये यथा मां प्रपद्यन्ते ताँस्तथैव भजाम्यहमिति * प्रतिज्ञावान् भगवान् यथा मुमुक्षून् भजते तत्तत्फलप्रदानेनाश्रयते स्वस्मिन्नेव स्थापयति, न तु पुनस्तेषां पूर्वावस्थां सम्पादयति तद्वदस्मदाद्यर्थं तदवतारभूतस्त्वमेवमप्यस्माँस्त्वदङ्गसङ्गोत्कण्ठाकाङ्क्षावतीर्मा त्यज, अपि त्वस्मदभिलषितफलप्रदानेनाश्रय । तथाच मोक्षोपाधिकमपि भगवद्भजनं यथा मुमुक्षूणां भगवता शुद्धत्वेनैवाङ्गीक्रियते तथा त्वदङ्गसङ्गोपाधिकमपि तच्छुद्धत्वेनैवाङ्गीकर्तुं योग्योऽसीति भावः । स्वसन्निधित्यागो न कर्तव्य इति वक्तुं स्वभक्तत्यागं च कर्तुं भवान्नार्हति, नाऽपि स उपदेशः सफलो भविष्यतीत्यप्यनेन ध्वनितम् ॥ अनभिज्ञापक्षे, भो विभो समर्थ एवं गदितुमपि भवान्न, आचरितुं नार्हतीति किमु वक्तव्यमित्यर्थः । यद्यपि परमैश्वर्यवाँस्तथापि परमधार्मिकत्वेन प्रख्यातस्य श्रीनन्दरायस्य पुत्रः स्वयं च रसार्द्र इति सूचनाय भवानित्युक्तम् । नृशंसं साक्षान्मारकम् । तथाचास्मदुपदेशाय प्रवृत्तेन त्वया वाङ्नाराचकृताऽसंख्यातस्त्रीवधजनितपातकोत्पत्तिर्न विचारितेति भावः । अथवा, हे विभो! अस्मत्प्राणनाथ । तथाच स्वनाथाऽस्मत्प्राणरक्षणमेव तवोचितं, न तु तन्नाशनमिति भावः । तत्रापि भवान्, मयेमा रंस्यथ क्षपा * इति कृतप्रतिज्ञः । प्रतिज्ञाय करोमीति कर्तव्यं

तदकुर्वतः * मिथ्यावचनदग्धस्य इष्टापूर्त्तं विनश्यतीत्यादिशास्त्रज्ञो भवान्। तथाचास्मद्दोषोद्धाटनाय प्रवृत्तस्त्वं स्वप्रतिज्ञानाशादिबृहद्दोषान्न पश्यसि । तदुक्तं शकुन्तलया— राजन् सर्षपमात्राणि परच्छिद्राणि पश्यसि * आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यसीति भावः । ननु, स्वागतं वो महाभागा इति परमकोमलमपि प्रथमं मयैवोक्तं तत्किमर्थं विस्मर्य्यत इति चेन्न । तस्याप्यलंकृत्य शिरश्छेदनवन्निवर्तनार्थतया नृशंस एवान्तर्भावात् । भवतु भवन्मुखचापनिःसृतवागस्त्रजालेन दग्धप्राणा वयमितः परं परलोकमेव यामो, न तु व्रजं, त्वं त्वसंख्याता अस्मान् हत्वा किं पदं प्राप्स्यसीति न विद्म इत्याशयेनाहुः ॥ संत्यज्येति ॥ वान्ताशनवत् पुनर्ग्रहणायास्माभिः सर्वविषया न त्यक्ता इति द्योतनाय समित्युक्तम् । तथाच, व्रजस्यानामयम् * रजन्येषेत्यादिवाक्यजातं निरर्थकमेवेति भावः । ननु किमित्येवमत्युपालम्भं दातुं प्रवृत्ताः । प्रियं किङ्करवाणि वः * ब्रूतागमनकारणमिति मदुक्तं श्रुत्वा तूष्णीं स्थिता भवतीर्दृष्ट्वा पुनर्गन्तुकामा निष्कामाश्चालक्ष्य, रजन्येषेत्याद्युक्तं मया । ततो माऽस्तु कोपो, यत् प्रार्थनीयं तन्निःशङ्कं प्रार्थ्यतामितिचेत् तत्राहुः ॥ अस्मान् त्वदतिरिक्तविषयकाङ्क्षारहिता भजस्व स्वीयत्वेन समाश्रयस्व। सन्त्यज्येत्यादिना, ननु कथं गोपगृहिणीर्वोऽहं भजामीति शङ्काऽपि निराकृता। तव पादमूलं भक्ता इत्यनेन, न वयं वनशोभादिनिरीक्षणार्थमागता इति—दृष्टं वनमित्याद्युक्तं समाहितम । पादे, पद्मत्वानुक्त्या किञ्चित्संरम्भेण नृशंसवाक्यपादयोः काठिन्यं व्यञ्जयन्ति । ननु युष्माभिः सर्वं यथार्थमेवाभिधीयते, तथापि नाहं भवतीर्भजामि, स्वतन्त्रत्वादितिचेत् तत्राहुः ॥ हे दुरवग्रहेति ॥ अयमाग्रहो दुष्टो भवति । स्वतन्त्रस्यापि तवैवंविध आग्रहो नोचितः । चतुरशिरोमणित्वात् । दुराग्रहो हि

मूढधर्म इति भावः । अतोऽनन्यगतीरस्मान् मा त्यज, त्यागस्यानिर्वाच्यदोषोत्पादकत्वात् । नन्वस्तु दोषस्तेन मम का हानिरित्याशङ्क्याहुः । अहो किमेवंविधगर्वगिरिशृङ्गमारूढोऽसि । किमाप्तकामादात्मारामात् परमेश्वरादप्याधिक्यं प्राप्तोऽसि, यतः सोऽप्येवं न करोतीत्याशयेनाहुः ॥ देव इति ॥ यथा धर्माद्यनपेक्षः सर्वलोकसंहारकृत् पापाऽसंस्पृष्टः सकलैश्वर्य्यसम्पन्नः स्वयम्प्रकाशो ब्रह्मादिकारणभूतः स्वभक्तान् मुमुक्षून् भजते तत्प्रदानेन सेवते, तथा त्वं स्वतन्त्रोऽप्यस्मन्मनोरथपूर्तिं कर्तुं योग्योऽसीत्यर्थः । मुमुक्षूनित्यनेन ते मुमुक्षवो, न तु तदेकेप्सव इति तेषां स्वतो निकृष्टतां सूचयन्ति । यद्वा, अमुमुक्षून् मोक्षाद्यनिच्छून् । यद्वा, मुमुक्षून् तदन्यत् सर्वं त्यक्तुमिच्छून् शरणागतान् । दुरवग्रह इत्यनेन, हे विषमात्रवर्षकमेवेत्यप्युक्तम् । अवग्रहो वृष्टिप्रतिबन्ध इति पाणिनिस्मरणात् । दुष्टः— अवग्रहो यस्मिन् स प्रतिषिद्धवृष्टिर्मेघः । तस्य दुष्टत्वं च ऊष्मवायुवर्षकत्वात् । तथाचेतरजलस्थानीयस्वपत्यभिकाङ्क्षाविनिर्मुक्ता मेघस्थानीयत्वदेकशरणाश्चातकीकल्पा वयं त्वदधराऽमृतपानार्थमागतास्त्वं त्वस्मदभाग्योदयात् सम्प्रति विषं वर्षसि । भवतु, विषमेव पीत्वा मरिष्यामो, न तु व्रजं यास्यामः । चातकीस्वभावत्वात् । तस्माद् अस्मान् मा त्यज । कृतज्ञस्य तव च नेदमुचितमिति भावः । ननु चातकीसमानां भवतीनां मरणेन मम चातक्यपेक्षारहितमेघकल्पस्य का हानिरिति चेद्, न त्वं केवलं जडमेघसदृशः, किन्तु परमाभिज्ञदुःखमोचकमाजकचेतनरूपपरमात्मसदृशोऽपीत्याशयेनाहुः ॥ देव इति ॥ यद्वा, भक्ता अस्मान् भजस्व दुराग्रहम् आसमन्तात् त्यज । बुद्धेः फलमनाग्रह * इत्युक्तत्वात् परमबुद्धिमतस्तवाग्रह एव नोचितो, दुराग्रहस्तु दूरनिरस्त इति भावः ॥ मानिनीपक्षे, एवं = प्रियं किं करवाणीत्यादिरूपं, नृशसं

क्रूरं गदितुं नार्हसीति । यद्यपि भवान् सौन्दर्य्यादिगुणसागर-स्तत्रापि विभुः परमसमर्थस्तथापि परदारा एवं न वक्तव्या इति भावः । यदि परदारैरेव तव रमणेच्छा तर्हि याः सर्वविषयान् संसज्य तव पादमूलं भक्तास्ता दुरवग्रह स्वच्छन्दं यथा स्यात् तथा भजस्व । अस्मान् आसमन्तात् सर्वप्रकारेण सज । यद्वा अस्मान् दुःसाध्याः प्रति दुराग्रह सज । प्रभवोऽपि भजमानमेव भजन्त इत्याशयेनाहुः ॥ देव इति ॥ आदिपुरुषो देवो, यदपेक्षया-ऽधिकप्रभुत्वविशिष्टः कोऽपि नास्ति, स यथेत्यर्थः ॥

निवृत्तिपक्षे, एवं प्रतिरुद्धाः श्रुतयः साक्रोशमाहुः ॥ मैवमिति ॥ एवं ब्रह्मणि श्रुतीनां प्रामाण्यं नास्तीत्येवमादिरूपं नृशंसं सर्वघातुकं गदितुं भवान् नार्हति। ननु नाहं ब्रवीमि, किन्तु शास्त्र-तत्त्वाऽनभिज्ञास्ते ते वादिन एवं जल्पन्त्यऽतो नाऽहमुपालम्भविषय इति चेत् तत्राहुः॥ हे विभो! व्यापक। तथाच, अनेन जीवेनात्मना-ऽनुप्रविश्य नामरूपे व्याकरवाणीति श्रुत्या नामरूपात्मकसंसार-विस्तराय तादृशजीवात्मना त्वमेव ब्रवीषीति भावः। यतः, संस-ज्य सर्वविषयाँस्तव पादमूलं भक्ता अस्मान् भजस्व । दुरवग्रहम् आसज। नायं मोक्षमार्गः, किन्तु परमानर्थाऽसद्भावप्रापकः । अस-न्नेव स भवति असद् ब्रह्मेति चेद्वेदेत्यादिश्रुतेः । तस्माद् यथा मुमुक्षूणां मोक्षः स्यात् तथा करुणो विधेयस्याशयेनाहुः ॥ देव इति ॥ यथा आदिपुरुषो देवो भवान् मुमुक्षून् भजते मोक्षदाता भवेत् तथाऽस्मान् भजस्व। तथाच परमपुरुषार्थमोक्षलाभाय ब्रह्म-ण्यस्मत्प्रामाण्यमवश्यमास्थेयमित्यर्थः । अयमाशयः । सर्वान् वि-षयान् प्रतिपाद्यान् सम्यक् परित्यज्य ब्रह्मणि समन्वितानां श्रु-तीनामन्यपरत्वाभिधानं साहसमात्रम् । तत्र श्रुतिवाक्यानां द्विविधा ब्रह्मणि प्रवृत्तिः । एका ब्रह्मात्मनोरेकत्वविषया, अपरा सत्यज्ञाना-

दिलक्षणब्रह्मविषया । तत्राद्या यथा, सोऽयं देवदत्त इति पदत्रयस्यैकस्मिन् देवदत्ते पर्यवसानं तद्वत् । तथाहि । यथोक्तवाक्यं, सोऽयमिति विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशव्यक्तिमात्रलक्ष्यपरम् । तथा, तत्त्वमसिवाक्यमपि विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशचैतन्यव्यक्तिमात्रपरम् । ननु पूर्वतन्त्रे पदार्थानां संसर्गः, संसृष्टाः पदपदार्था वाक्यमिति वाक्यार्थलक्षणमुक्तम् । तच्च द्विविधमप्यखण्डार्थं न सम्भवति । ततः कथं वाक्यार्थलक्षणशून्यमखण्डं ब्रह्म वाक्यार्थः स्यादितिचेन्न । वेदान्तशास्त्राऽऽचार्यश्रीबादरायणानुयायिभिः, संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः * अखण्डैकरसत्वेन वाक्यार्थो विदुषां मत इति वदद्भिरखण्डस्य वाक्यार्थत्वाभिधानात् । नचैवं सत्युक्तलक्षणस्य तत्राव्याप्तिः । सामान्यलक्षणस्यैव यावद्विशेषव्याप्तिनियमाद् विशेषलक्षणयोरेतयोः परस्पराव्याप्तेरदूषकत्वात् । सामान्यलक्षणं तु वाक्यप्रमेयत्वमत्राप्यस्त्येव । नचाखण्डवाक्यार्थस्य विशेषलक्षणाभावः । अपर्यायानेकपदैरेकप्रातिपदिकार्थमात्रपरत्वस्यैव तल्लक्षणत्वात् । ननु तत्त्वम्पदलक्षितरूपे भिन्ने ? किं वा न ? । आद्ये ऐक्यप्रमित्यसम्भवः । द्वितीये पदार्थवाक्यार्थयोरेकत्वापत्तिरिति चेन्न । द्वितीयपक्षोक्तदोषस्येष्टापत्तिग्रस्तत्वात् । नच पदद्वयवैयर्थ्यम् । लक्षणयैकार्थबोधनार्थत्वात् । त्वम्पदस्य वाच्यार्थपरित्यागेन चिल्लक्षकत्वं तत्पदसामानाधिकरण्ये सति घटते । तथा तत्पदस्यापि वाच्यार्थपरित्यागेन चिल्लक्षकत्वं त्वम्पदसामानाधिकरण्य इति न पदद्वयवैयर्थ्यम् । एवं सत्यज्ञानाद्यवान्तरवाक्येऽखण्डार्थत्वम् । यथा केन चित् पृष्टोऽस्मिञ्ज्योतिर्मण्डले कश्चन्द्रो नामेति ?। तस्य प्रतिवचनं— प्रकृष्टप्रकाशश्चन्द्र इति वाक्यस्य । अत्र प्रकृष्टशब्दान्न चन्द्रप्रातिपदिकार्थसिद्धिः ।प्रकृष्टं तम इति प्र-

कृष्टशब्दस्य प्रकृष्टसन्तमसेऽपि प्रयोगदर्शनात् । तथा प्रकाशशब्दादपि न तत्सिद्धिः । खद्योतादावपि तत्प्रयोगदर्शनात् । तस्माद्वाच्यार्थपरित्यागेनाऽप्रकर्षाऽप्रकाशविरोधी चन्द्रप्रातिपदिकार्थः पदद्वयेन प्रतिपाद्यत इत्यखण्डार्थत्वसिद्धिः । अन्यथा चन्द्रप्रातिपदिकार्थमात्रप्रश्नोत्तरतया विशिष्टमर्थं बोधयतो वक्तुरनवधेयवचनता स्यात् । तथा, विमतम् अखण्डार्थम् । लक्षणवाक्यत्वात् । प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदिति सिद्धम् । यद्यपि प्रमाणान्तराभावाद् ब्रह्मण्युपनिषदां प्रामाण्यमुक्तं, किमबाधलक्षणप्रामाण्यं, किं वा प्रमाणान्तरसम्भिन्नार्थविषयत्वात् पौरुषेयं वेत्याक्षेपे प्रामाण्यं, किं वा प्रमाणान्तरयोग्यार्थविषयत्वात् तत्सिद्ध्यर्थानुवादरूपमप्रामाण्यम् । नाद्यः । गृहीतसङ्गतिकस्य पुंसः सत्यादिवाक्यश्रवणे अबाधितानधिगतार्थप्रमितिदर्शनात् । प्रमाणेन हि प्रमीयमाणस्यार्थस्य प्रमाणान्तरासंवादो न मिथ्यात्वापादकः । सर्वप्रमाणानामनधिगतार्थगन्तृत्वात् । अन्यथा चक्षुषा गृह्यमाणस्य रूपस्य त्वचाऽग्रहणान्मिथ्यात्वाशङ्का स्यात् । न द्वितीयः । प्रमाणान्तरसम्भिन्नार्थत्वाभावात् । पौरुषेयवचनप्रयुक्तत्वे हि सम्भेदस्य भूतार्थप्रयुक्तत्वे प्रत्यक्षादीनामपि सम्भेदः स्यात् । नापि तृतीयः । स्पर्शज्ञानयोग्यद्रव्यविषयस्य चक्षुषोऽनुवादकत्वादर्शनात् । एवं सिद्ध उपनिषदां ब्रह्मणि प्रामाण्ये तद्गतानां पदानामर्थान्तरकल्पना न युक्ता । श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । नच तेषां कर्तृस्वरूपप्रतिपादनपरता वक्तुं शक्या । तत् केन कं पश्येत्, एकमेवाद्वितीयमित्यादिना क्रियाकारकफलादेर्निराकृतत्वात् । नापि ब्रह्मण उपासनाविधिशेषत्वं सम्भवति । एतेन हेयोपादेयशून्यत्वेन क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः । यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टं, तथापि ब्रह्मात्मविज्ञानस्य

फलपर्यन्तत्वात् तत्तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम् । हितशासनाच्चोपनिषदां शास्त्रत्वमिति सङ्क्षेपः । एतेन, स्वागतमित्याद्याक्षेपो निरस्तः। यत्तु— रजन्येषेत्यादि, तत्तु यथार्थमेव । तत्र निद्रितानामज्ञानामपेक्षया ब्रह्मणो निशातुल्यत्वात् । तदुक्तं— या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॐ इत्यादि । यत्तु— मातर इत्यादि, तदपि तु. असन्नेव स भवति असद् ब्रह्मेति चेद्वेदेत्यादिना मात्रादितुल्यत्वाभिमानिनामास्तिकम्मन्यानामसत्त्वाभिधानेन तेषां भयोत्पादनस्य समुचितत्वात् । योऽपि— दृष्टं वनमित्यादिनोपहासः, सोऽपि साहसनिबन्धनः । अन्तःकरणतद्धर्माणां ह्यसंवेद्यत्वात् । अधिकार्य्यभावे, निचाय्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेत्यादिश्रुतीनां निरालम्बनतापत्तेश्चेति दिक् ॥ ३१ ॥

यदप्युक्तं, तद् यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः, भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमाययेत्यादि तत्राप्याहुः ॥

यत् पत्यपत्यसुहृदामनुवृत्तिरङ्ग !
स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ॥
अस्त्वेवमेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ ३२ ॥

यदिति ॥ यत्पत्यपत्यसुहृदामनुवृत्तिः स्त्रीस्वधर्म इति धर्मविदा त्वयोक्तमेतदुपदेशपदे त्वय्येवमेवाऽस्तु । अङ्ग ! हे भगवन्निति कोमलामन्त्रणेन, न वयं प्रातिकूलं वदाम इति सूचयन्ति । त्वं हि उपदेशविषयः । त्वद्बुद्ध्यैव पत्यादिसेवनम् उत्कृष्टफलप्रदमतः साक्षाद्भगवति सति किं परम्परयेति भावः। यत, ईशे, त्रिविदिषा-

वाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भावः । यद्वा, ईशे अन्तर्यामिणि । जीवो हि यत्रान्तर्यामिरूपेण त्वया प्रेर्यते तत्रैव प्रवर्तते । अतः स्वभङ्गमार्थं त्वयैव प्रेरिता वयं त्वदाराधनं समीहामहे । तस्मादन्तर्यामिरूपेण स्वाराधने प्रेरणं, प्रेष्ठरूपेण पत्याद्याराधने इत्यस्मद्व्याकुलताऽऽपादिका प्रवृत्तिर्भगवतो नोचिता । अन्तर्यामिकृतप्रेरणस्यैव प्रबलत्वादिति भावः । किञ्च, उपदेशनियोज्य उपदेशविषयश्च त्वमेवातस्त्वदाराधने नास्ति किमपि बाधकमित्याशयेनाहुः ॥ प्रेष्ठः = परमप्रेमास्पदम् । अत एवात्मा, परमप्रेमास्पदस्यैवात्मत्वात् । स च तनुभृतां सर्वेषां तनुर्न तु यस्य कस्य चित् । अतः सर्वेषां बन्धुरूपो भवानेव यः सम्प्रत्यऽस्मदनुग्रहार्थं नन्दनन्दनविग्रहस्तस्मादुपदेशकर्तृतदनुष्ठातृतद्विषयात्मनस्तवाराधनमेव मुख्यं सर्वाराधनमिति भावः। यद्वा, त्वय्युपदेशपदे धर्मोपदेशकर्तरि सति अस्मासु धर्मं जिज्ञासमानासु सतीषु एतत् त्वयोक्तमेवमस्तु । न तु वयं तथा, नापि भवान्; किन्तु भवानात्मेति । अथवा, एतदुक्तमुपदेशपदे पुरुषेऽस्तु नाम, त्वयि तु ईशे स्वामिनि सति एवं क, नैवमित्यर्थः। यद्वा, उपदेशपदे उपदेशेन न निवर्तनीये लौकिकपुरुषे आसक्तचित्तत्वे एतदेवमस्तु, ईश्वरे त्वयि तु नैवमित्यर्थः । यतस्तनुभृतां त्वमात्मा फलरूपः । अथवा एवमेतत् त्वय्येवाऽस्तु । कुतः । उपदेशपदे आराधनीयत्वेनोपदिश्यमानानां पत्यादीनां पदे अधिष्ठाने । यतः, ईशे । न हीश्वरमधिष्ठानम् ऋते कोऽपि पतिपुत्रादिर्नाम । अध्यस्तस्याधिष्ठानानतिरेकात् । तस्मान्न वयमनुचिते कर्मणि प्रवृत्ता इति भावः । यद्वा, यत् त्वयोक्तमेतदेवम् आदावुपदेशकर्तरि आचार्ये त्वय्यऽस्तु । आचार्यसेवनपूर्वकस्यैव धर्मानुष्ठानस्य सफलत्वप्रतिपादनात। तत्रापि ईशे परमेश्वरे । एवमप्याचार्यः स्यात् तर्हि किमु

वक्तव्यम् । ईश्वरत्वादेव तनुभृतामात्मा । तत एव प्रेष्ठस्तत एव बन्धुः सुहृत् । सात्मकानामेव पत्रादीनां सेवनं दृश्यते, न तु मृतानां तेषाम् । तद्दाहविधानात् । अतोऽस्मद्भाग्यवशात् सदानन्दाऽऽत्मैव प्रकटितस्तस्मात्त्वत्सेवने प्रवृत्तानामस्माकं किं तैरिति भावः । अनभिज्ञापक्षे, अधिकारमबुद्ध्वैव धर्ममुपदेष्टुं प्रवृत्तोऽसि । निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेध * इत्युक्तत्वाद् ब्रह्मज्ञानामस्माकं विधिनिषेधाधिकाराभावादित्याशयेनाहुः ॥ यदिति ॥ इति यद्धर्मविदा त्वयोक्तमेतदुपदेशास्पदे तदेकस्वभावे एवमस्तु क्रियताम् एवमुपदेशो, न वयं निवारयामः । परन्तु स्वाधिकाराभावान्न तं गृह्णीम इति भावः ॥ धर्मविदेति ॥ धर्मस्वरूपमात्रं वेत्सि, न तु तदुपदेशाधिकारम् । यद्वा, अथापि धर्मविदसि, न तु ब्रह्मवित् । अत एव ब्रवीषीति सोपहासं व्यङ्ग्यम् । यद्यपि निवारणमुचितमधिकारं विनाऽरण्यरोदनप्रायस्योपदेशस्य निषिद्धत्वात् । तथापीश्वरत्वात् तव नास्त्यस्माकं निवारणसामर्थ्यमित्याशयेनाहुः ॥ ईश इति ॥ यद्वा, अधिकारं विनोपदेशकर्तृत्वमनुचितमपि प्रभुत्वान्नो विरुद्ध्यते । ननु, वामैव विभुतेत्युक्तत्वेन विभुतायाः कुटिलप्रवृत्तिजनकत्वावगमाद् अधिकाराऽभावसाधकमात्मानुभवमावेदयन्ति ॥ प्रेष्ठ इति ॥ अस्मत्प्रेष्ठो भवानेव । सर्वेषां तनुभृतां बन्धुर्हितैषी परमात्मा आत्मा च । यद्वा, सर्वेषां परप्रेमास्पदभूतो य आत्मा यश्च सुहृत् परमेश्वरः स, तत्त्वमसिवाक्ये तत्त्वम्पदोपलक्षितो भवानेव । तथाचाखण्डवाक्यार्थबोधवतीनां कुतस्त्वदुक्तधर्मेऽधिकारः, कुतश्चाऽशुभसम्बन्धः । पश्यतः सर्वभूतानि सर्वावस्थासु सर्वदा * ब्रह्मभूतस्य संयोगो नाऽशुभस्योपपद्यत इत्यादिशास्त्रादिति भावः । ब्रह्मज्ञम्मन्यानां पक्षमवलम्ब्येयमुक्तिर्द्रष्टव्या । तेषां तदभिमानेन यथेष्टाचरणे प्रवृत्तिदर्शनात् । तदुदाहरणन्तु—ब्रह्मैव

सर्वमिति वेदविदो वदन्ति तस्मान्न मे सखि पराऽपरभेदबुद्धिः * जारेऽथवा निजवरे सदृशोऽनुरागो व्यर्थं किमर्थमसतीति कदर्थयन्तीत्यादि । यद्वा, स्त्रीणां स्वधर्म इति यत्र त्वयोक्तमेतदुपदेशपदे त्वय्यस्तु । एतदुपदेशविषयो भवानेवाऽतो न वयमुपदेशनीयाः । ननु मम कुत उपदेशविषयत्वमित्याशङ्क्य सौन्दर्य्यमाधुर्य्यादिगुणगणालङ्कृतस्यास्मच्चित्तकर्षकस्य तवैवंविधत्वमेवास्मद्धर्मनाशे प्रयोजकमिति भावः । यद्वा, इति यत्त्वयोक्तं तदस्माकं मनसि न प्रविशति । यतस्त्वं धर्मविन्न तु तदनुष्ठाता । यो यस्य धर्मस्यानुष्ठाता न भवति, केवलं धर्मं जानाति, न तद्वाक्यात् कस्यचित् तस्मिन् धर्मे प्रवृत्तिर्भवति । अतः काचिन्महाभागा पातिव्रत्यधर्मानुष्ठानपरा योषिद्वीराऽस्मानुपदिशेच्चेत् तर्ह्यस्मन्मनसि तद्वाक्यं प्रविशेदतः किमर्थं जल्पसीति भावः । अस्मद्वाक्यमेतासां हृदि प्रविशत्विति यदि तवाग्रहस्तर्ह्येतदुपदेशपदे गुरौ त्वय्यस्तु । तथाच विष्णुना यथा मोहिनीरूपं धृतं तथा त्वमपि स्त्रीरूपमादाय स्त्रीधर्ममाचर, ततोऽस्मानुपादिशेति गुर्वनुष्ठिते कर्मणि शिष्यभूतानामस्माकमपि प्रवृत्तिः सौकर्य्येण भविष्यतीति भावः । नन्वनुष्ठायाऽप्यहं दर्शयामि, परन्तु किं कर्तव्यं !! स्त्रीत्वं नास्ति ममेतिचेत् तत्राहुः ॥ ईश इति ॥ सर्वकलासमर्थे त्वयि स्त्रीभावोऽपि न दुर्घट इति भावः ॥ ननु कपटेन गृहीतस्त्रीभावस्य मम पाणिग्रहीतुरलभ्यत्वात् कथं पातिव्रत्यधर्मानुष्ठानमिति चेत् तत्राहुः ॥ प्रेष्ठो भवान् ॥ स्वभावत एव प्रियो मनोहरात्मा च । तथाच यथा मोहिन्या जानन्नपि कपटस्त्रीभावं, स्वाभाविकस्त्रीभावां परमप्रियामुमां विहाय सन्दग्धकामः परमजितेन्द्रियोऽपि श्रीरुद्रस्तद्ग्रहणायाधावत्, तथा लोकोत्तरसौन्दर्य्यवति त्वयि कपटेनापि गृहीतस्त्रीभावे जानन्तोऽपि कोटिशः स्वस्वदारान् परित्यज्य त्वद्ग्रहणाय धाविष्यन्त्यऽतो न

पतिदौर्लभ्यमिति भावः । अनेनाहो विधात्रा धर्मविनाशायैव त्वं रचितोऽसि । पुरुषत्वे स्त्रीणां धर्मं नाशयसि, गृहीतस्त्रीभावे पुरुषाणां तन्नाशयिष्यसि ।धर्ममनुष्ठातुं तु त्वं कदापि न समर्थोऽसि। यथेदानीं पुरुषधर्ममेकपत्नीव्रतलक्षणमनुष्ठातुमशक्तो, बह्वीनां स्वस्मिन्नासक्तत्वात् । तथा गृहीतस्त्रीभावेऽप्यसंख्यातपुरुषाणामासक्तिजनकत्वात् । तस्मादनुष्ठाय उपदेष्टुमशक्तस्त्वं किमर्थं वृथा कण्ठशोषणाय प्रवृत्तोऽसीत्यपि ध्वनितम् । यद्वा धर्मविदा त्वया इति यदुक्तमेतदुपदेशपदे त्वयि एवमस्तु, त्वदङ्गेष्वेव जीर्णं भवतु । ग्राहकाभावात् । अहो ज्ञातमस्माभिर्नवीनं धर्मवित्त्वं त्वया सम्पादितमतः शिष्याः सम्पादनीयाः । यथोक्तधर्मश्चोपदेष्टव्य इति तव महत्युत्कण्ठा वर्त्तते । ततोऽस्मानेवमुपदेष्टुं प्रवृत्तोऽसि । परन्तु न वयं त्वां गुरुं कर्तुं समागता, अतः किमर्थमपात्रदानात् स्वधनं नाशयसि । अप्रतिपित्सितमर्थं प्रतिपादयन्ननवधेयवचनो भवति । तथाच धर्मविद् यद्यपि जातोऽसि, तथाप्यधिकारानाधिकारविवेकलेशनापि विधुरोऽस्यऽतः सम्प्रत्येतत् त्वयि तिष्ठतु । गुरोः सकाशाद् यथोक्तविवेकमपि लब्ध्वैतदधिकारलाभे सुखेनोपदेशं करिष्यसीति भावः । यतस्त्वमीशः ॥ यथोक्तोपदेशधारणेऽधिकारस्वीकारेऽधिकारिसम्पादने च समर्थः । भवसस्तर्हि किमर्थमागता इतिचेत् तत्राहुः ॥ तनुभृतां सर्वेषां चतुर्दशभुवनस्थानां सौन्दर्य्यादिविशिष्टविग्रहवतां मध्ये भवान् मनोहरस्वरूपोऽतोऽस्माकं प्रेष्ठः । तथाच त्वयि रमणबुद्ध्या समागता वयमतो न यथोक्तोपदेशार्हा इति भावः ॥ मानिनीपक्षे, पत्याद्यनुवृत्तिलक्षणः स्त्रीणां स्वधर्म इति त्वयोक्तम् एतदुपदेशकर्तरि समर्थे त्वय्येवमस्तु । सर्वदैवमत्र त्वया वयमुपदेशनीयाः। धर्मविदेत्यनेन अहो ज्ञातम् अद्यास्माभिः— त्वं धर्मविदसीति सूचितम् । योग्यं चैवमुपदेशकर्तृत्वं तव, यतः स्व-

स्मिन् प्रेमकृतः शुभपथ्येव प्रवर्त्तन्ते सज्जनैरित्याशयेनाहुः ॥ प्रेष्ठ इति ॥ भवान् प्रेमविषयो यतो बन्धुः । यथोक्तोपदेशकर्तृत्वाद् हितैषी। अत आत्मा स्वात्मतुल्यः । तथाच, कः सत्यभर्ता, शुश्रूषणीयः कः, को वा कपटधर्मेत्यादिविवेकवतीनाम् अस्माकमग्रे स्वपाण्डित्यं नोद्घाटनीयमिति भावः । यद्वा इति यत् त्वयोक्तमेतदेवमुपदेशपदे त्वय्यऽस्तु । त्वमपि स्वधर्ममाश्रित्य तिष्ठ, न त्वस्माकं स्वस्य च धर्मं नाशयेति भावः । यतस्त्वमीशो नाशसंरक्षणयोः समर्थः । यदि तु मदभिस्नेहवतीनां नः स धर्मः, कपटपूर्वकत्वादिति तत्राहुः ॥ प्रेष्ठ इति ॥ तनुभृतां सर्वेषां प्राणिनां भवान् आत्मवत् प्रेष्ठः । यतः सर्वेषां हितैषी । तथाच सर्वेषां तनुभृतां यथा त्वयि प्रीतिस्तथाऽस्माकमप्यतो विशेषप्रीतिभ्रमादस्मासु दोषमारोप्याऽस्मद्धर्मं नाशयितुमयोग्योऽसीति भावः ॥

निवृत्तिपक्षे, एवं साक्षाद्ब्रह्मप्रतिपादकश्रुतिभिः स्वस्य ब्रह्मणि समन्वयोऽभिहित इदानीम्, इन्द्रो यातोऽवसितस्य राजा, अग्निर्मूर्द्धा दिव इत्यादिका श्रुतयः स्वाभिप्रायं ब्रह्मण्यावेदयन्ति ॥ यदिति ॥ यत् स्त्रीणधर्मिकाणां श्रुतीनामिन्द्रादिप्रतिपादिकानामस्माकमिन्द्राद्यनुवृत्तिस्तात्पर्येण तत्र प्रवृत्तिः स्वधर्म इति धर्मविदा त्वयोक्तम्, एतदेवं त्वय्यस्तु । यत उपदिश्यमानानामिन्द्रादीनां पदे अधिष्ठाने, यत ईश्वरे सर्वकारणभूते । यतश्च भवान् प्रेष्ठत्वात् तनुभृतां सर्वेषामिन्द्रादीनामात्मा तद्बन्धुस्तत्सम्बन्धीन्द्रादिविग्रहरूपश्च । तथाच किमपि विकारजातं प्रतिपादयन्त्यः श्रुतयः सर्वाधिष्ठानभूतं सर्वात्मानं सर्वस्वरूपं परमात्मानं तमेव प्रतिपादयन्ति । सर्वे वेदा यत् पदमामनन्तीत्यादिश्रुतेरिति भावः ॥ ३२ ॥

सन्मार्गे प्रवृत्ता वयं प्रशंस्या, न तूपालम्भयोग्या इत्याशयेन सदाचारं प्रदर्शयन्ति ॥

कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्म-
न्नित्यप्रिये पतिसुतादिभिरार्तिदैः किम् ॥
तन्नः प्रसीद परमेश्वर मा स्म छिन्द्या-
दाशां धृतां त्वयि चिरादरविन्दनेत्र ! ॥ ३३ ॥

कुर्वन्तीति ॥ कुशलाः कर्तव्याकर्तव्यादिविवेकवन्तः, किं प्रजया करिष्यामो येषां नोऽयमात्मा लोक इत्यादिशास्त्रतत्त्वविदः पुरुषधौरेया नारदादयो, योषिद्वरा गार्गीसुलभाद्याश्च त्वयि रतिं कुर्वन्ति । यतः, स्वे स्वस्वरूपभूते आत्मनि, अत एव नित्यप्रिये । अन्यत् सर्वं यदा स्वात्माऽनुकूलं भवति तदा प्रियं भवति, न तु सर्वदा । स्वात्मा तु सर्वदैव प्रियः । तथाचैवम्भूते त्वय्येव रतिरुचिता । तत्संस्थोऽमृतत्वमेति, यदात्मरतिरेव स्यादात्मतृप्तश्च मानवः * आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते * इत्यादिशास्त्रात् । अतः पतिसुतादिभिः किं मोक्षप्रतिबन्धकैः, किं प्रयोजनम् । बन्धवो दृढबन्धनम् * इत्युक्तत्वात् । प्रत्युतार्तिदैः सम्प्रति वियोगादिना जन्मादिसंसृतिचक्रनिक्षेपणादिना चाऽऽर्तिप्रदायकैः । ये हि संस्पर्शजा भोगा दुःखयोनय एव ते * इत्यादिशास्त्रात् । एवं यथोक्तनिर्देष्टृत्वमुपपाद्य पूर्वदिक्स्थाः प्रार्थयन्ते ॥

तदिति ॥ यस्मात् पतिपुत्राद्यनुवृत्तिर्निन्दिता, त्वदनुवृत्तिर्विहिता सदाचारप्राप्ता चाऽतोऽस्माभिर्योग्यमेव कृतम् । तस्मान्नोऽस्मान् प्रति प्रसीद । ननु मयि प्रसन्ने किं भवतीति चेत् तत्राहुः ॥ हे परमेश्वर! ब्रह्माद्यधीश्वरे त्वयि प्रसन्ने पुरुषार्थचतुष्टयमपि सिद्ध्यति । अकामः सर्वकामो वा मोक्षकाम उदारधीः * तीव्रेण भक्तियोगेन यजेत पुरुषं परम् * इत्युक्तत्वात् । ननु भवतु, प्रसन्नोऽहं

युष्मभ्यं मोक्षं ददामीति चेद्, न वयं सम्प्रति मोक्षकामा इत्याशयेन आहुः ॥ मा स्मेति ॥ चिराद् रामाऽवतारादारभ्य त्वयि धृताम् अस्माभिः सह रमणं करिष्यतीत्येवं रूपाम् आशां भवान् मा च्छिन्द्यात् । आशापूर्तिरेव प्रभुभिः क्रियते, न तु तच्छेद इति प्रसिद्धि-द्योतनार्थं— स्मेति ॥ ननु सर्वात्मभावं जानतीनां युष्माकं स्व-पतिरूपेण मया रमणेन सन्तोषः किमिति न भवतीति चेत् तत्राहुः ॥ हे अरविन्दनेत्र ॥ अनावृतब्रह्मात्मभावेन तुच्छीकृतकोटिकाम-विग्रहेण पुण्डरीकाक्षेण भगवता त्वया रमणाभिकाङ्क्षावसो वयं, न त्वावृतब्रह्मात्मभावैर्मलमूत्रादिविग्रहैः स्वपतिभिः । अत एत-त्स्वरूपेणैवास्मदाशापूर्तिर्विधेयेति भावः । यद्वा, अरविन्दनेत्र ! श्री-रामचन्द्रविग्रहदर्शनजन्यैतद्विग्रहसङ्गमाऽऽशापूर्तिमेतद्विग्रहेणैव कर्तुं योग्योऽसीति सम्बोधनाशयः ॥ वरदेश्वर इति पाठे वरदानामी-श्वरः । श्रीरामचन्द्रात्मना वने स्थितस्य तव दर्शनमात्रेणैव वर-स्य लब्धत्वादिदानीं तत्साफल्यमपेक्षितमिति भावः ॥ अनभिज्ञा-पक्षे, यथोक्तात्मज्ञपक्षमवलम्ब्य यदुक्तं तत्र सदाचारं प्रमाणमाहुः ॥ कुर्वन्तीति ॥ कुशला मनीषिणो नित्यप्रिये स्वात्मभूते त्वय्येव रतिं कुर्वन्ति, पतिपुत्रादिभिरार्तिदैः किमिति विचार्य्य, तत् त-स्मान्नः प्रसीद । यतस्त्वं परमसमर्थः, त्वत्प्रसादो न निष्फल इति भावः । वरदेश्वर इति पाठे, मयेमा रंस्यथ क्षपा *इति त्वया वरो दत्तस्तं सार्थकं कर्तुं समर्थ इति भावः । तस्मादाशाच्छेदोऽत्यन्त-निषिद्ध इत्याहुः ॥ मा स्मेति ॥ चिराद्, बालभावमारभ्य त्वयि धृतामाशां भवान् मा च्छिन्द्यात् । हे अरविन्दनेत्र ! परमसुन्दर । तथाच लोकोत्तरसौन्दर्य्यादिविशिष्टो भवानेव अस्मदन्तःकरणे प्रविश्याऽऽशामुत्पादितवान् । अतः स्वेनोत्पादितां स्वगुणैर्वर्द्धितां स्वेनैव पूरयितुं योग्यामाशालक्षणां लतां फलकाले कर्णकठोरो-

त्त्यादिकुठारेण छेत्तुं नार्हसि ।यतो, विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम् * इति न्यायं जानास्येवेति भावः । स्वस्मिन्नात्मत्वोच्छेदेन यदि त्वं भूतिकामस्तर्ह्याशापूर्तिरूपमस्मत्पूजनमवश्यं कुरु । आत्मज्ञमर्च्चयेद् भूतिकाम इति श्रुतेरिति ध्वनितम् । यद्वा, य एतस्मिन् महाभागा * इत्यादिगर्गोक्तिमनुस्मृत्याहुः ॥ कुर्वन्तीति ॥कुशला महद्भाग्यलब्धसारासारविवेकास्त्वयि रतिं कुर्वन्ति । यतः स्वीये आत्मनि अन्तःकरणे नित्यप्रिये, यद्वा नित्यप्रिये स्वस्मिन् परस्मिँश्च नित्यप्रिये त्वयि ।अतस्तद्विपरीतैः स्वीये आत्मनि चार्त्तिदैर्दुःखप्रदैः पत्यादिभिरस्माकमपि कुशलानां किं प्रयोजनम् । तत् तस्मान्नः प्रसीद । त्वयि चिराद् धृतामाशां भवान् मा च्छिन्द्यात् । सर्वं परित्यज्य त्वदाशया जीवामः । तदुच्छेदे त्वदवलम्बनाभावात् सद्य एव मरिष्याम इति भावः । ननु भवतीनां नाद्यापि तथाविधप्रेमातिरेको दृश्यत इत्यत एवं ब्रवीमीति चेत् तत्राहुः ॥ हे अरविन्दनेत्र ! अहो ज्ञातमस्माभिः, भोः सखे! रजनीयं, भवाँश्चारविन्दनेत्रः । अतो मुकुलितनेत्रकमलत्वादस्माकं प्रेम्णः परां काष्ठां न पश्यसीति सनर्म व्यङ्ग्यम् ॥ मानिनीपक्षे, ननु सर्वेषां प्राणिनामहं प्रेष्ठ इति यदि भवत्यो जानन्ति तर्हि स्वाधिकारानुरूपां रतिं कुतो न कुर्वन्तीत्याशङ्क्याहुः ॥ कुर्वन्तीति ॥ कुशलाः स्वधर्मनिपुणाः साध्व्यः, आर्त्तिदैः— दो अवखण्डने। दुःखच्छेदकैः पत्यादिभिर्हेतुभूतैः स्वीयेगृहादौ आत्मनि च नित्यप्रिये सति, त्वयि रतिं रमणबुद्धिं कुर्वन्ति किम् ? । अपि तु न कुर्वन्तीत्यर्थः । तत् तस्मान्नः प्रसीद । हे परमेश्वर ! व्रजाधीश्वरपुत्र! त्वां त्वत्प्रसादं प्रार्थयाम इति भावः।पाठान्तरे, हे वाञ्छितप्रद । प्रसादमेवाहुः ॥ चिराद् वयमत्र, मा आस्म = न तिष्ठाम ।लटि रूपं छान्दसम्। शीघ्रं गृहान् गन्तुमनुजानीहीत्यर्थः।

ननु चिरकालमारभ्य ममाऽऽशा वर्ततेऽत एवं न वाच्यमिति चेत् तत्राहुः ॥ आशामिति ॥ चिरात् त्वयि धृतां स्थिताम् । धृङ् अवस्थाने अस्मत्सङ्काशाम्, अतः परं भवान् छिन्द्यात् । यतो, हे अरविन्दनेत्र ! ॥ कमलवद्विशालनेत्रस्य प्रसहमस्माकं स्वधर्मनिष्ठतां पश्यतोऽत्यन्ताऽसाध्येऽर्थे प्रार्थना नोचितेति भावः । यद्वा कुशलाः स्वीये आत्मवन्नित्यप्रियेऽपि त्वयि पत्यादिभिर्दुःखनिवारकैर्हेतुभूतै रतिं कुर्वन्ति किम्। अपि तु न कुर्वन्ति। समानमन्यत्। यद्वा, साध्वी बलयुता भ्रातृमती भर्तृप्रिया बहु * असाध्या सा भवेन्नारी वर्जनीयाऽपमृत्युदेत्युक्तमसाध्यालक्षणं स्वास्मिन् सूचयन्त्य आहुः ॥ कुर्वन्तीति ॥ अहो कुशला अस्मदाद्याः पत्यादिभिः स्वीये आत्मनि देहादौ नित्यप्रिये तत्करणीयप्रीतिविषये सति रतिं कुर्वन्ति किम् ?। तत्रापि आर्तिदैः॥पापसम्भावनयापि परमपीडाप्रदैः । समानमन्यत् । यद्वा, तिष्ठतु पतित्वविचारः, प्रीतिविचारश्च । अस्माकं तु सर्वतो विरक्तिं सम्पाद्यात्मरतिः कर्तव्येति सतां मद्दात्तिदर्शनेन सम्प्रति मनीषा वर्तत इत्याशयेनाहुः ॥ कुर्वन्तीति ॥ तु अयि इति च्छेदः । अयि, हे सौम्य ! हि प्रसिद्धम् । कुशलास्तु स्वे वस्तुतः स्वरूपभूते आत्मनि नित्यप्रिये रतिं कुर्वन्ति, न तु तद्विपरीते देहादौ । नोऽस्माकम् आर्तिदैरपत्यादिभिः किं प्रयोजनमिति विचार्य्य कथं रतिं कुर्वन्तीत्यपेक्षायामाहुः ॥ तदिति ॥ यतः सर्वं दुःखस्वरूपं तस्माद्, हे परमेश्वर ! त्वं प्रसीद । प्रसन्नो भूत्वा वयं विषयाऽऽशया त्वयि मा आस्म । त्वदन्यभूता वयं न स्थितास्तामाशां, हे अरविन्दनेत्र ! भवान् छिन्द्यात् । हे ईश्वर परब्रह्मविषया मा प्रमा छिन्द्यादिति वा । यद्वा, हे अरविन्दनेत्र ! परमेश्वरविषयिणी मा प्रमा चिरात् कालमारभ्य धृतां स्वीकृतां विषयाशां छिन्द्यात्। ततस्त्वयि, आस्म त्व-

दनन्या भवामेत्येवम्प्रकारेण रतिं कुर्वन्तीत्यर्थः । यद्वा, भोः चतुरशिरोमणे, नेयं परदारेषु रत्याशा शोभना । कुशलास्तु स्वपतिभार्यादावपि रतिं विहाय स्वात्मन्येव रतिं कुर्वन्तीत्याशयेनाहुः ॥ कुर्वन्तीति ॥ तस्मात् त्वमपि प्रसीद, किमर्थं ग्लायसीति भावः । प्रसादे सर्वदुःखानां हानिरस्योपजायते * इति प्रसिद्ध्या प्रसादे सति, हे परम ! हे अरविन्दनेत्र ! ईश्वर ! परमा चिरात् त्वयि अवस्थितां सर्वदुःखनिदानभूतामाशां छिन्द्यादित्यर्थः ॥

निवृत्तिपक्षे, प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म * एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति * पुरुष एवेदं विश्वं कर्म तपो ब्रह्म पराऽमृतम् * एतद्यो वेद निहितं गुहायां सोऽविद्याग्रथिं विकिरतीह सोम्य * तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति * भिद्यते हृदयग्रन्थिरित्याद्याः श्रुतयो वैराग्यादिसाधनसम्पन्नास्त्वय्येवात्मनि परमात्मस्वस्वरूपे प्रत्यगभिन्ने, यतो निरतिप्रिये रतिं, आर्तिप्रदैः पत्यादिभिर्नः किं प्रयोजनमिति विचार्य्य, तस्माद् हे परमेश्वर ! चिरादनादिकालादारभ्य त्वयि धृतामाशामभिप्रायं कश्चिदपि मा च्छिन्द्यात् । छेदनपरः परमेश्वरेण त्वया दण्डनीय इति सम्बोधनाऽऽशयः । यद्वा, तदन्तःस्थितेन त्वया तच्छेदनाय स न प्रेरणीय इत्याशयेनाहुः ॥ हे अरविन्दनेत्र ! सर्वहृत्कमलप्रकाशन ! इति ॥ ३३॥

यदपि वनदर्शनार्थमागतास्तस्य च जातत्वादितः परं प्रतियातेत्युक्तं तत्राऽऽप्याहुः ।

चित्तं सुखेन भवताऽपहृतं गृहेषु
यन्निर्विशत्युत करावपि गृह्यकृत्ये ॥
पादौ पदं न चलतस्तव पादमूलाद्

यामः कथं व्रजमथो करवाम किं वा ॥ ३४ ॥

चित्तमिति ॥ गृहादिषु यच्चित्तं सुखेन निर्विशति तत् त्वयाऽपहृतम् । एवमग्रेऽपि । यद्वा, तदपहारे न भगवतः प्रयास इत्याशयेन आहुः ॥ सुखेनाऽऽनन्दस्वरूपेण । तथाच साक्षादानन्दस्वरूपे त्वयि लब्धावस्थानं चित्तं गृहेऽपि न निर्विशति दूरे वनदर्शनादौ तत्प्रवेशः । तथा करावपि गृहोचितकृत्ये न निर्विशतः । दूरे पुष्पफलाद्युपचयः । न हि तस्करहृतः कस्मिंश्चित् कर्मणि केनाचिन्नियुज्यत इति भावः। तथाच तव पादमूलात् तत्समीपात् पादौ पदं न चलतः । नाऽन्यत्र गच्छतः । तव पादमूलादित्यनेन त्वत्पादसाहित्यं चेत् तदा सर्वत्र गन्तुं शक्ताविति सूचितम् । अतो गमनसाधनाभावाद्व्रजंकथंयामः । ननु भवतीनां पद्भ्यां गमनसामर्थ्यं नास्ति चेत् तर्हि शकटादिना प्रेषयिष्यामीति चेत् तत्राहुः ॥ करवामेति ॥ अथो अथ तत्र गत्वा किं करवाम तत्तद्व्यापारसाधनचित्तादेस्त्वयाऽपहृतत्वादिति भावः ॥ अनभिज्ञापक्षे, न वयं वनशोभाऽऽशादिदर्शनार्थमागता, नापि तव सङ्गमार्थमपि तु चोरितं स्वचित्तं ग्रहीतुमागता इति नर्म व्यञ्जयन्त्य आहुः ॥ चित्तमस्माकमपहृतम् ॥ केनेति चेत् तत्राहुः ॥ भवता ॥ चोरचक्रवर्तिना। ननु भवत्योऽसन्तं मिथ्यावादिन्यः। वनस्थेन हि मया तदायासरहितेन कथमपहृतमिति चेत् तत्राहुः ॥ सुखेनाऽनायासेन । वेणुरवादिभृत्यसद्भावे तदपहरणे को वा तव प्रयास इति भावः । न चेदं स्वल्पम्, एदपहारेण सर्वस्यापि गृहादेर्लुण्ठितत्वाद् इत्याशयेनाहुः ॥ यच्चित्तं गृहेषु सर्वेषु बाह्येषु इन्द्रियरूपेषु च निर्विशेषेण विशति तदपहृतमित्यर्थः । अतः करावपि यौ गृहकृत्येषु निर्विशतः । उतेत्यनेन नेत्रादीनामपि संग्रहः । ननु संप्रति

गच्छत, श्वः परश्वो वा दास्यामीति चेत् तत्राहुः ॥ पादौ तद्विना तव पादमूलात् पदं न चलतः । धृतस्य चोरस्य त्यागो न न्याय्य इत्यपि ध्वनितम् । अथो अतो व्रजं कथं याम, गत्वा च किं करवाम । सर्वसाधनचित्तरूपधनाभावादित्यर्थः । यद्वा, किं वा करवाम । चित्तादेः सर्वस्यापहारात् । चौरं भवन्तं प्राप्यापि तदादातुं, त्वां ग्रहीतुं, नेतुं, राजाद्यग्रे, आक्रोशनार्थं गन्तुं चाशक्तत्वात् । स्तम्भनादिमन्त्रज्ञेऽलौकिकचौरे किंकरवामेति भावः । यद्वा, सुखरूपेण भवता चित्तादेरपहृतत्वाद् गृहादीनि ज्वलन्तु, समृद्ध्यन्तु, किमस्माकं तैरतस्तन्नामाप्यस्मदग्रे नोच्चारणीयमितिभावः॥मानिनीपक्षे, ननु तिष्ठतु वादः, संप्रत्येव भवत्यः समागता रात्रावत्र विश्रम्य प्रातर्गमिष्यथेति चेत् तत्राहुः ॥ चित्तमिति ॥ सत्यमुक्तं त्वया, तथापि गृहेषु भवता जायमानेन सुखेन चित्तमस्माकमपहृतम् । यद्यस्माद्गृहकृत्येषु निर्विशति, करावपि तत्र निर्विशतः । ननु भवतु तथाप्यतिसुकुमारत्वात् पदमपि गन्तुमशक्ताभ्यां पद्भ्यां कथं गमिष्यथेति चेत्तत्राहुः ॥ पादौ तव पादमूलात् कथं पदं न चलतः, किन्तु चलत एव । अतः कथं व्रजं न याम । अत्र स्थित्वा च किं करवाम । यद्वा, यद्यपि पादौ पदमपि गन्तुं न शक्तौ, तथापि तव पादमूलात् कथञ्चिद् व्रजमेव शनैः शनैर्याम । अन्यथाऽत्र स्थित्वा किं करवामेत्यर्थः ॥

निवृत्तिपक्षे, ननु सर्वासां श्रुतीनां ब्रह्मपरत्वे कर्मणस्तत्तात्पर्याविषयत्वात्तदनुष्ठानादेर्वैयर्थ्यं प्राप्तमित्याशङ्क्य, तत्त्वज्ञानात् पूर्वं तद्वैयर्थ्यमाशङ्क्यते ? तदुत्तरं वा ? नाद्यः । यत्र तु द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिना संसारदशायां क्रियाकारकादेः सद्भावाभिधानात् तद्वैयर्थ्याऽनवगमात् । न द्वितीयः । यत्र त्वस्य सर्वम् आत्मैवाभूत् तत् केन कं पश्येदित्यादिना तदुत्तरं तद्वैय-

र्थस्येष्टत्वादित्याशयेनाहुः ॥ चित्तमिति ॥ सुखरूपेण भवता चित्तं यदाऽपहृतं सच्चिदानन्दघने प्रत्यगभिन्ने परमात्मनि चित्तं यदा लीनं तदा गृहेषु बाह्येष्वभ्यन्तरेषु च न निर्विशति । अत एव करावपि गृह्यकृत्ये न निर्विशतः । पादौ पदमपि न चलतः । तथाच सर्वेन्द्रियव्यापारानिवृत्त्या तत्त्वविदः कर्माधिकाराभावात् तदपेक्षया कर्मानुष्ठानादेर्वैयर्थ्ये नास्ति दोषः । नैव तस्य कृतेना-ऽर्थो नाकृतेनेह कश्चन * नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्र-य * इत्यादिशास्त्रादिति भावः । अतस्तव पादमूलाद् वयं व्रजं कथं यामः । कर्मकाण्डश्रुत्यानुगुण्यं कथं भजामः । तासामप्यस्म-दनुयायित्वात् । गत्वा च किं करवाम । क्रियाकारकादिप्रतिषेध-बोधिकानामस्माकं तदानुगुण्यासम्भवादिति भावः ॥ ३४ ॥

एवं दक्षिणादिग्गता उक्ताः प्रार्थयन्ते ॥

सिञ्चाङ्ग ! नस्त्वदधराऽमृतपूरकेण<br>
हासावलोककलगीतजहृच्छयाग्निम् ।<br>
नो चेद् वयं विरहजाग्न्युपयुक्तदेहा<br>
ध्यानेन याम पदवीं पदयोः सख ! ते ॥ ३५ ॥

सिञ्चेति ॥ अङ्ग ! हे भगवन्! अस्मद्हृच्छयाग्निं सिञ्च, न तु निर्वापय त्वद्विषयकामस्य परमसुखरूपत्वात् । यतस्त्वयैवोत्पादित इत्याहुः ॥ हासेति ॥ तव योऽयं हासपूर्वकोऽवलोकः कलगीतं च ताभ्यां जातो यो हृच्छयः कामः स एवाग्निः । तत्र हासः काम-जनकः, अवलोकः सन्धुक्षणकर्त्ता, गीतं वायुरिव । तत्रापि कल-गीतं सर्वतो वायुः । सिञ्चनं च न वा घृतादिना, स्वर्गस्थाऽमृ-तेन, चन्द्रस्थसुधया वा सम्भवति । तेषां यथाकथञ्चिदुदरप्रवेश-

योग्यानामप्यनभिलषितत्वेन हृदये प्रवेशायोगादित्याशयेनाहुः ॥ त्वदधराऽमृतपूरकेण ॥ अलौकिकेन पूरकेणाऽपि सिञ्चनोक्त्या यथोक्ताग्नेः परममहत्त्वं सूचितम् । सिञ्चनप्रार्थनया भगवद्विषयः काम एवास्मज्जीवनं जठराग्निवदिति ध्वनितम् । अन्यथा स्वस्य यदनुष्ठेयं, तदावेदयन्ति ॥ नो चेदिति ॥ सिञ्चनेन यदि न जीवयसि तर्हि विरहजाग्निना उपयुक्तदेहा दग्धशरीरास्ते पदयोः पदवीम् । अन्तिकं योगिवद् याम प्राप्नुयाम । उपयुक्तपदेन, त्वयोपभोग्यदेहानां यथोक्ताग्निनोपयुक्तत्वमयुक्तमिति ध्वनितम् । ननु सिञ्चनेनातिप्रवृद्धः कामाग्निर्दाहको भविष्यतीत्याशङ्कानिरासाय विरहाऽग्निनेत्युक्तम् । तथाचाऽतिप्रवृद्धोऽपि जाठराग्निर्यथेष्टभोजनलाभे सति न दहति, अनशनादिना तदलाभात्तु दहति। तथा हृच्छयाग्निरपि स्वभोग्यालाभे तदाशानिवृत्त्या विरहाग्निरूपेण परिणतो दहतीति भावः । यद्यपि तव प्राप्तौ नास्त्यस्माकं किञ्चिदपि प्रतिबन्धकं तथापि भगवदुपभुक्तदेहानां भगवत्प्राप्तिरभिलषिता, तद्विपर्यये महद् दुःखमतः सखिरूपेणावतीर्णस्य तव यथाऽस्मन्मनोरथपूर्तिर्भवेत् तथाऽनुष्ठानं योग्यमिति सूचयन्त्यः सम्बोधयन्ति ॥ हे सखे इति ॥ अथवा यद्यप्यस्मन्मरणे तव नास्ति काचिद्धानिस्तथापि सखित्वात् पश्चात्तापस्तु भविष्यत्येवेति सम्बोधनाऽऽशयः ॥ अनभिज्ञापक्षे, अनेन निर्वस्त्राङ्गदर्शनार्थं यथा वस्त्राहरणलीलाऽऽरब्धा, तथा निर्लज्जवचनश्रवणार्थमियं लीला समारब्धेति विज्ञाय विस्पष्टं प्रार्थयन्ते ॥ सिञ्चेति ॥ आदौ क्रियापदप्रयोगेणोत्कण्ठाधिक्यं सूचयन्ति ॥

अङ्ग ! हे प्रिय ! नः कामाऽग्निं सिञ्च।निर्वापय। यतस्तव हासाऽवलोककलगीताभ्यां जातश्चोद्दीप्तः । तथाच अस्मद्हृदयशयमेव कामाग्निं हासावलोकाभ्यां कलगीतलक्षणेन मन्थानदण्डेन प्रबोध्य

वाचः पेशैः प्रदीप्य तत्रास्मान् अस्मत्प्राणान् दग्धुमवक्रान्तोऽसि । नेदमुचितमतस्तज्जनितपापाद् विभेषि चेत् तर्हि तं निर्वापय । येनैवाऽग्निः प्रदीप्यते तेनैव पश्चात्तापेन झटिति यदि निर्वाप्यते तर्हि तदैव तत्पापं निवर्तते इति भावः । ननु सम्प्रति ममान्तिके जलपूर्णभाजनाभावात् कथं सिञ्चामि तथा चेद् भवतीनामाग्रहस्तर्हि यमुनासन्निधौ चलनीयमिति सोपहासमाशङ्क्याहुः ॥ अमृतेन, तत्राप्यग्नेः परममहत्त्वात् तत्पूरकेण । स्वार्थे कन् । ननु जलमपि यत्र दुर्लभं तत्राऽमृतं कुतस्त्यं; तद्बिन्दोरपि दुर्लभत्वात् तत्पूरः कुत इत्याशङ्क्य कथमस्मज्जीवनसाधनं गोपायसि !! प्रत्यक्षोपलभ्यमानस्य गोपनाऽयोगादित्याशयेनाहुः ॥ त्वदधरेति ॥ अहो नाल्पेनाऽमृतसमुद्रेणापि तच्छान्तिरतोऽस्तु तद्दौर्लभ्यं, येनाऽमृतेन तच्छान्तिस्तन्न तव मुखचन्द्र एवास्त्यऽतो नास्ति तव कोऽप्यायास इति भावः । अनेन ज्वालनोपशमनयोरुभयोरपि स्वायत्तत्वादुभयविधा क्रीडोचिता, न त्वेकविधा । दुर्लीलाकर्तृषु राजकुमारेष्वपि तथा दर्शनादित्यपि ध्वनितम् । हृच्छयाग्निरित्यनेनान्तरोऽयं दाहात्मको रोगविशेषस्त्वदधराख्यपात्रविशेषं मुखे निधाय पीतेनाऽन्तःप्रवेशसमर्थेन तत्रस्थाऽमृतपूरकेणैवोपशान्तिं गमिष्यति, न तु अन्यैः कोटिभिरभ्युपायैरिति ध्वनितम् । ननु मम स्वाभाविकहासादिभिर्यदि युवत्यो ज्वलेयुस्तर्हि कुत्र कति वा स्वाधराऽमृतदानेन चिकित्स्या इति चेत् तत्राहुः ॥ नो चेदिति ॥ यदि न सिञ्चसि तर्ह्ययमेकोऽग्निस्तेन शोषितदेहास्तथा विरहजाग्निना दग्धशरीरास्ते पदयोः पदवीं सान्निध्यमधुनैव ध्यानेन प्राप्नुयाम । अन्ते मतिः सा गतिरिति न्यायात् प्राणान् विहायाऽपि प्रेष्ठसान्निधानं संपाद्यामिति स्वप्राणेभ्योऽपि स्नेहाधिक्यं सूचयन्त्यः संबाधयन्ति ॥ हे सखे इति ॥ यद्वा, पूर्वजन्मन्यऽकृततपस्का वयमतो वि-

रहाग्निना प्राणान् जुहुमः । ततस्तत्र पादयोः पदवीं मार्गं प्राप्नुयामस्तद्रूपा भविष्यामः । ततोऽनिच्छतोऽपि तव पादौ अस्मत्स्तनेष्वेव पतेतां, न तु भूमौ । ततश्च त्वत्पादभारेणैवोपशान्तहृच्छयाग्नयो वयं सिद्धमनोरथा भविष्यामः । त्वं चानिच्छन्नप्यस्मत्कुचस्पर्शं सुखं प्राप्नुवन्नपि स्त्रीवधानुतापमेव भूयांसं प्राप्स्यसि । तथाच सखीरस्माँस्त्वमेव संतापयसि चेत् तर्हि वयम् अपि त्वां सखायमेवं कथं नानुतापयामः । परन्तु प्रेमहतकस्तदनुतापदुःखमपि कोटिगुणीकृत्य अस्मभ्यमेव दास्यते इति जानीमः । किं कुर्मोऽस्माकं दग्धललाटमेवंविधमेव विधात्रा सृष्टम् । तस्माद् भोः ! परिणामादर्शन कृपासागर स्वानुतापवल्लीबीजं किमर्थं वपसि, कथं वा फलभोगाभागिनीरस्माँश्च करोषि । मुक्त्वाऽसदाग्रहमङ्गीकुरु अस्मानित्याशयः । यद्वा, अकर्त्तव्यप्रार्थनामाकर्ण्यापि विमुखमालक्ष्याहुः ॥ नो चेद् वयमिति ॥ नन्वेतावत्पर्यन्तं कामाऽग्निना कथं न दग्धा इत्याशङ्क्य तत्सिञ्चनाऽऽशया संजीविता वयमितः परं तन्निवृत्त्या सोऽग्निर्विरहाजाऽग्निश्चेत्यग्निद्वयसत्त्वे जीवनं दुर्लभमिति भावः । नन्वस्तु, तेन मम का हानिरिति चेत् तत्राहुः ॥ ध्यानेनेति ॥ तथाच निरवधि दुःखं दातुं प्रवृत्तोऽसि । तादृशं दुःखं तुभ्यं दातुं नास्माकं सामर्थ्यम् । अस्मद्विरहेण तव दुःखानुदयात् । संयोगस्य तादृशदुःखजनकत्वेऽप्यस्मिञ्जन्मनि तस्य दुर्लभत्वादिदं शरीरं दग्ध्वा तव पादयोर्मार्गभावं याम। तेन च सर्वदा स्वसंयोगेनैवंविधं तव दुःखं दास्याम इति भावः । तथापि परस्परदुःखप्रदानं न सख्यधर्म इत्याशयेनाहुः ॥ हे सख इति ॥ यद्वा, नन्विदानीमिदं दुर्घटं जन्मान्तरे स्यादित्याशङ्क्याहुः ॥ नो चेद्, इदं दुर्घटमेवेति चेत् तर्हि ध्यानेऽपि ते पदयोः सान्निध्यं न याम । यतो विरहजाग्नेरेवोपयुक्ता उचिता, न तु संयोगाऽमृत-

योग्या देहा यासां ताः । अधुनेव जन्मान्तरेऽपि विरहस्यैव निश्चयादिति भावः । तस्मात्त्वया सम्पादितं सख्यं वृथैव सम्पन्नमिति सम्बोधनाशयः ॥ मानिनीपक्षे, अङ्ग! हे लम्पट ! नोऽस्माकं सहजेन हासादिना जातो यस्तव कामानलस्तं त्वदधराऽमृतपूरकेणैव सिञ्च । तादृशाग्न्युपशामकतादृशाऽमृतदानयोग्यायाः कस्याश्चिदस्मास्वऽभावात् । इष्टे मधुरादिवस्तुनि दुर्मिले दृष्टे सति स्वोष्ठपुटी लोके यथा लिह्यते तद्वदिति नर्मव्यञ्जनम् । यद्वा, नोऽस्मत्तस्त्वऽन्यासामेवाधराऽमृतपूरकेणेत्यर्थः । बलात्कारमालक्ष्याहुः ॥ नो चेद्, बलादस्मदधराऽमृतपानाय प्रवर्त्स्यसे चेत् तर्हि वयं स्वपतिविरहजाग्न्युपयुक्तदेहा भवेम, म्रियेमहि । तथापि ध्याने चिन्तनेऽपि ते पदयोर्मार्गमपि, न याम = न यास्याम । आलक्ष्यसख्यादऽस्मत्स्वभावं जानासीति सम्बोधनाशयः ॥

निवृत्तिपक्षे, तरति शोकमात्मवित्, ब्रह्मविदाप्नोति परं, नाऽन्यः पन्था विद्यतेऽयनाय इत्यादिश्रुत्या परमपुरुषार्थाऽनन्यसाधनतत्त्वज्ञानस्यास्मदवलोकनादिना यथाकथञ्चिदपि जातस्य करुणाऽमृतधारयाभिषिञ्चनेन वर्द्धनम् उचितमिति प्रार्थयन्ते ॥ सिञ्चेति ॥ अङ्ग हे परमात्मन्! नोऽस्माकं श्रुतीनां हासपूर्वकं प्रसन्नतापूर्वकमऽवलोकनं = श्रवणपूर्वकं मननम् । कलयति सर्वतश्चित्तवृत्तीराकर्षतीति कलं, तच्च तद् गीतं गानं = निदिध्यासनं च, ताभ्यां जातो यो हृच्छयस्य सवासनस्य कामादेर्दाहकत्वादग्निस्तं ज्ञानाग्निं त्वदोष्ठपुटनिःसृतवाङ्मयाऽमृतपूरकेण कृष्णद्वैपायनाद्यात्मना त्वं सिञ्च वर्द्धय । यथा यथोक्ताग्निस्तत्तद्वादिकल्पितकुतर्कजलप्रवाहैर्नोपशाम्येत तथा कुर्विति अभिप्रायः । कृष्णाद्यात्मनाऽवतीर्णस्य भगवतो वचनाऽमृतत्वमुक्तम् । प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ॥ ज्ञानमुद्राय कृष्णाय गीताऽमृतदुहे नमः ॥ । जयति पराशरसूनुः

सत्यवतीहृदयनन्दनो व्यासः * यस्यास्यकमलगलितं वाङ्मय-ममृतं जगत् पिबतीत्यादिना ज्ञानस्याग्निरूपत्वमुक्तं भगवता। यथै-धांसि समिद्धोऽग्निर्भस्मसात् कुरुते तथा * ज्ञानाग्निः सर्वकर्मा-णि भस्मसात् कुरुतेऽर्जुन * यस्य सर्वे समारम्भाः कामसङ्कल्प-वर्जिताः * ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः * इत्या-दिना तत्सेचनं तेनैव कृतम्। न हि ज्ञानेन सदृशं पवित्रमिह विद्य-ते * तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते * उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतमित्यादिना। विपक्षे दोषमाहुः॥ नो चेद्, न सिञ्चसि चेत्, तर्हि वयं, तत्तद्वादिप्रतिपादितेन— श्रुतिषु प्रत्यगभिन्नपरमात्मनिरूपणं नास्तीत्यादिरूपेण तव विरहलक्षणा-ऽग्निनोपयुक्तदेहा भक्षितस्वरूपा नष्टा भवेम। तथापि ते पदयोः पदवीं तत्त्वं, ध्यानेन याम = तत्राभिप्राप्तवयसो भविष्यामः। वस्तव-ऽन्यथाभावस्य वादिसहस्रैरपि कर्तुमशक्यत्वादिति भावः। यस्मा-द् वागर्थयोः सख्यं वर्ततेऽतस्तौ कदापि न वियुक्तौ भवत इति सम्बोधनाशयः॥ ३५॥

ननु यद्यपि निःसीमप्रेमवत्यो भवत्यस्तथापि मर्य्यादापालनार्थं पत्यादिसान्निधौ स्थित्वैव मदाराधनं कर्त्तव्यमिति चेत् तत्राहुः

यर्ह्यम्बुजाक्ष तव पादतलं रमाया
दत्तक्षणं क्वचिदरण्यजनप्रियस्य॥
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग! (१)
स्थातुं त्वयाऽभिरमिता बत पारयामः॥ ३६॥

यर्हीति॥ हे अम्बुजाक्ष! यर्हि यत्प्रभृति तव पादतलं वयम्

(१) अञ्ज इति पाठान्तरम्।

# विज्ञापनम् ।

## बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ।॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानिसंग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

### तत्र मुद्रिता ग्रन्थाः ।

| | रु० | आ० |
|---|---|---|
| सिद्धान्ततत्त्वविवेकः खण्डानि ५ | ५ | ० |
| अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः | १ | ० |
| तन्त्रवार्त्तिकम् खण्डानि १३ | १३ | ० |
| कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६ | ६ | ० |
| सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता | १ | ० |
| वाक्यपदीयम् खण्डानि ६ ( प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्डानि ३। द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्डानि ३ ) | ६ | ० |
| रसगङ्गाधरः खण्डानि ९ | ९ | ० |
| परिभाषावृत्तिः खण्डे २ | २ | ० |
| वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २ | २ | ० |
| शिक्षासङ्ग्रहः खण्डानि ५ | ५ | ० |
| नैष्कर्म्यसिद्धिः खण्डानि ४ | ४ | ० |
| महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम् | ३ | ० |
| ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४ | ४ | ० |
| (बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४ | ४ | ० |
| विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २ | २ | ० |

| | | |
|---|---|---|
| तत्त्वदीपनम् ( पञ्चपादिकाविवरणस्य व्याख्यानम् ) ख० ८ | ८ | ८ |
| वदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ | ३ | ० |
| टुपटीका खण्डानि ४ | ४ | ० |
| पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति ख० | १ | ० |
| व्याकरण मिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि १० | १० | ० |
| रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ | ३ | ० |
| भेदधिक्कारः व्याख्यासहित. श्रीमदप्पयदीक्षितकृत उपक्रम पराक्रमसहितः खण्डे २ | २ | ० |
| बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० | १० | ० |
| ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता खण्डे २ | २ | ० |
| दैवज्ञकामधेनु. अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ | ३ | ० |
| श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य-व्याख्या समेतम् खण्डानि १५ | १५ | ० |
| तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा—तत्त्वत्रयचुलुक-संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । | १ | ० |
| श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-तिपादनपरम् । | १ | ८ |
| गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-व्याख्या । | १ | ० |


ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सडक बनारस सिटी